दाहुः। वक्ष्यमाणसंयोगेनाग्नावैष्णवी पठिता। आरम्भसंयोगेनान्वारम्भणीयेति। प्रथमप्रयोगे विकल्पो ऽयम्। सर्वास्वेव विकृतिषु प्रथमप्रयोगे ऽन्वारम्भणीयां केचिदाहुः। अपरे याज्ञिका विकृतिष्वन्वारम्भणीयां नेच्छन्ति। अनयोपपत्त्या। इयं ह्यारम्भणीया उपदेशेन दर्शपूर्णमासयोरङ्गमतिदेशेन[1] विकृतीनाम्। वक्ष्यति च प्रयोगात्क्रियते। सा प्रकृतेर्दर्शपूर्णमासयोर्विकृतेश्च सौर्यादीनां तन्त्रेण विज्ञायते। कथम्? उच्यते। यथैव यूपस्याकर्मकत्वादिति। यूपः प्रकृतेरग्नीषोमीयस्य विकृतेश्च सवनीयानूबन्ध्ययोस्तन्त्रेण भवति। एवमियं[2] तन्त्रेण प्रकृतिविकृत्यर्था भविष्यति। ननु च सर्वविकृतीनां प्रक्रान्तत्वात्प्रक्रान्तापरिसमाप्तिदोष एवं प्राप्नोति। नेत्युच्यते। नैष दोषः। सर्वविकृतीनां[3] कर्तुमशक्यत्वात्। एवं च इष्ट्यावृत्तौ सकृदारम्भसंयोगादिति सकृदारम्भणीया लभ्यते। इतरथास्या आवृत्तिः स्यात्। यच्चेदमत्र व्याख्यायते अप्रवृत्तपूर्वस्य कर्तुः प्रवर्तनमारम्भः द्वितीयादिप्रयोगे च नाप्रवृत्तपूर्वः कर्ता अत आरम्भाभावान्न प्रयाजवदारम्भणीया चेति तदयुक्तम्। यस्मात्प्रथमो हि पदार्थः कर्मण आरम्भ उच्यते स पुनःपुनरपि क्रियामारभमाणस्य भवत्येव। प्रतिदिनमपि पाकं कुर्वन् पाकमारभत इत्युच्यते। कूपे च ग्रस्तस्य समाप्ते कूपान्तरं प्रक्रममाणो कूपान्तरं प्रारभत इत्युच्यते। एवं च चातुर्मास्याभ्यावृत्तौ तदारम्भार्थाया वैश्वानरपार्जन्याया आवृत्तिः सिध्यति इतरथा हि द्वितीयादिप्रयोगे आरम्भत्वाभावाच्च[4] स्यात्। कृतत्वात्।

---

१ C इति देशेन। २ C स्वयम् instead of इयम्। ३ C (orig.) प्रकृतीनां। ४ C om. च।

३८. चोदकप्राप्तमपि[1] यदेतदेव उच्यते। दीक्षणीयाधर्मप्राप-कार्थम्। एवमेव शाखान्तरश्रवणात्। ततोऽपराह्णे पौर्णमासी-विकारः पञ्चदशसामिधेनीकोपांशुहविर्विराजौ स्विष्टकृतो नित्ये वेत्येते विधयः सिद्धा भवन्ति। कृत्स्ना चेयमिष्टिस्वशब्दात्।

३९. प्रकृतादग्नीषोमीयादन्यस्मिन्पशौ सूक्तवाके नामग्रहणं यजमानस्य कार्यम्। चशब्दान्निर्वचनं चाशिषामिति। प्राकृतौ य-यवनिक्या इत्येवमाद्युक्ते ऽपि अन्यत्र चाग्नीषोमीयादित्युच्यते। तेन विशेषवचनात्सामान्यस्य बाधो मा भूदिति।

४०. वक्ष्यमाणमनुवचनं प्रातरनुवाकः। तत्प्रभृति यान्यादि-प्रदिष्टानि आदिं (ऋचं) गृहीत्वा विनियुक्तानि तानि शस्त्रानुवच-नयोः सूक्तानि सकलानि वेदितव्यानि। इह परिभाषा सूक्तवक्त-त्वप्रदेशप्रसङ्गात्[2]।

४१. शस्त्रानुवचनेभ्यो ऽन्यत्रादिप्रदेशे ऽप्येकां प्रतीयात्।

२.

१. ऊर्ध्वमर्धरात्रान्महारात्रम्। तस्मिन् प्रातरनुवाकार्थं होता-मग्नितो ऽग्रेणाग्नीध्रीयं धिष्ण्यं तिष्ठन् प्रपदः अप्रपन्नां स्थितः प्राग्दिगुपस्थानादेवमवस्थो जपति।

२. भूः प्रपद्य इत्येवमादिकं पितृभ्यः प्रतिनमस्कारेभ्यो वो ऽपि नम इत्येवमन्तं मन्त्रं प्रपदो जपति। नमः पितृभ्य इति प्राचीनोपवीती।

---

१ C om. पि। २ B चप्रसङ्गात्।

१. वक्ष्यमाणैर्मन्त्रैः यथारूपं च मन्त्रलिङ्गेभ्यो देवताः ।

३.

१. अस्यां मे प्राच्यां दिशीत्येवमादिना मन्त्रेण प्राचीम् । तदभिमुखो ऽन्यदिक्स्थे ऽपि चन्द्रमस्युपतिष्ठते ।

२. अस्यां मे दक्षिणस्यां दिशीत्येवमादिना मन्त्रेण दक्षिणां यथारूपमुपतिष्ठते । दक्षिणामिति नियमार्थम् । नैर्ऋत्यां मृत्युरिति संदेहः स्यात् ।

३. अस्यां मे प्रतीच्यां दिशीत्येवमादिना मन्त्रेण प्रतीचीं यथारूपमुपतिष्ठते ।

४. उदीच्यनुवादः सव्यावृद्विधानार्थः ।

५. उपतिष्ठत इति सर्वत्रानुवर्तते । दिगनुवादः प्राङ्मुखस्य विधानार्थः ।

६. अस्मिन्मे अन्तरिक्ष इत्येवमादिना अन्तरिक्षमुपतिष्ठते । प्राङ्मुखाधिकारात्[1] ।

७. उपतिष्ठत इति वाक्यशेषो ऽनुवर्तत एव ।

८. इहद्रयन्तरे म इत्यत आरभ्य सुत्रामाणं पृथिवीं द्यामनेहसमित्येतयर्चा सह जपित्वा । अनन्तरं किं करोति ।

९. जपानन्तरं दक्षिणेन बाहुनावृत्याग्नीध्रीये ऽग्नौ भूर्भुवः स्वरित्येवमादिकैर्मन्त्रैः स्वाहाकारान्तैः पञ्चाहुतीः स्रुवेण हुत्वा ततः सव्यावृद्धविधानयोः पूर्वस्यां द्वार्युपविशेत् ।

---

१ C अभिधानात् ।

१०. देवेभ्यः प्रातर्यावभ्यो ऽनुब्रूहीत्युक्तो हिंकारमपि मध्यमेन स्थानेन कृत्वा प्रातरनुवाकाख्यमनुवचनमाह।

११. प्रातरनुवाके याः पङ्क्यस्तासामयं धर्मः। चौन्पादाम्वसंधायावस्येत् द्वाभ्यां पादाभ्यां प्रणुयात्।

१२. अनूच्येत्येतदित ऊर्ध्वमनुवर्तते। यावत्प्रतिप्रियतममिति। आपो रेवतीः क्षयथा हि वस्व इत्येतामापोरेवतीमंज्ञितां[१] चिरनूच्य तत आग्नेयं क्रतुमन्वाह। अथोषस्यमिति प्रागत आग्नेयः क्रतुरुच्यते। अथानुष्टुभमिति प्रागतो गायत्रमुच्यते। अनयोः संज्ञाकरणं वाक्यार्थं शास्त्रसंव्यवहारार्थं च।

४.

१. नवर्चं सूक्तम्।

२. नवर्चं सूक्तम्।

३. द्वादशर्चं सूक्तम्।

४. अश्वं न त्वा वारवन्तमित्येता ऋचो दश।

५. पञ्चकं सूक्तम्।

६. पञ्चर्चं सूक्तम्।

७. नवर्चं सूक्तम्।

८. दूतं वो विश्ववेदसम्। अष्टकं सूक्तम्।

९. अग्ने मृळ महाँ असि। अष्टकं सूक्तम्।

१०. अर्चन्तस्त्वा हवामहे। षट्कं सूक्तम्।

---

१ A रेवतीरित्येतत्संज्ञितां, C (in marg.) ०वती रित्येतान्।

११. अग्निं स्तोमेन बोधय । षड्टं सूक्तम् ।

१२. उपसद्याय मीळ्हुषे । पञ्चदशर्चं सूक्तम् ।

१३. इमे विप्रस्य वेधसः । त्रयस्त्रिंशत्यृचं सूक्तम् ।

१४. समिधाग्निं दुवस्यतेति । त्रिंशदृचं सूक्तम् ।

१५. अग्निं हिन्वन्तु नो धियः । पञ्चकं सूक्तम् ।

१६. प्राग्नये वाचमीरय । पञ्चकं सूक्तम् ।

१७. त्वमग्ने यज्ञानामित्यत आरभ्य षड्विंशतिर्ऋचः ।

१८. अथशब्दः क्रमनियमार्थः । संज्ञाकरणं बाह्वृच्यार्थम् । संव्यवहारार्थं च ।

१९. ते ते अग्ने त्वोताः शाखान्तरे सूक्तादिस्ततः[1] सूक्तप्रतिषेधार्थमेकेत्युक्तम् ।

२०. होताजनिष्ट चेतनः । अष्टकं सूक्तम् ।

२१. त्वं हि चैतवद्यश इत्येता ऋचो नव ।

२२. अग्ने कदा त आनुषगित्येवमाद्याः पञ्च ।

२३. क्रमार्थोऽथशब्दः । संव्यवहारार्थं संज्ञा । बाह्वृच्यार्थं छन्दोवचनम् ।

२४. समस्य यद्वियुता सस्मिन्नूधन्नित्येता ऋचः पञ्च ।

२५. यो मर्त्येष्वमृत ऋतावा । त्रीण्येतानि सूक्तानि । एकपञ्चाशदृचः ।

२६. प्र वो देवं चित्सहसानमग्निमित्यादीनि पञ्च सूक्तानि । त्रिंशदृचः ।

---

१ C om. सूक्तप्रतिषेधार्थम् ।

२७. अग्ने बृहदुषसामूर्ध्वो अस्थात्। एवमादीनि सप्त सूक्तानि। एकोनपञ्चाशदृचः।

२८. अगन्म महा नमसा यविष्ठं त्रिकं सूक्तम्।

२९. उक्तार्थम्।

३०. एना वो अग्निं नमसा द्वादशर्चं सूक्तम्।

३१. प्र वो यज्ञं पुरूणां त्रिंशत्यृचं सूक्तम्।

३२. अग्ने विवस्वदुषस एता ऋचो द्वादश।

३३. सखायस्त्वा ववृमहे। एता ऋचो ऽष्टौ।

३४. अदर्शि गातुवित्तमः। एता ऋचश्चतस्रः।

३५. समिद्धश्चित्समिध्यसे। एतास्तिस्र ऋचः।

३६. अयमग्निः सुवीर्यस्येति षड्ढं सूक्तम्।

३७. उक्तो ऽर्थः पूर्वश्च।

३८. सूक्तं नवकम्।

३९. ईळिष्वा हि प्रतीव्यं सूक्तं त्रिंशदृचम्।

४०. पुरु त्वा दाश्वान्वोचे। सूक्तं त्र्यृचम्।

४१. पूर्ववदुक्तो ऽर्थः।

४२. वेदिषदे प्रियधामाय सुद्युते। एताः सप्त ऋचः।

४३. एति प्र होता व्रतमस्य माययेति सूक्तं सप्तर्चम्।

४४. यज्ञेन वर्धत जातवेदसं त्रयोदशर्चं सूक्तम्।

४५. जनस्य गोपा अजनिष्ट जागृविः। षड्ढं सूक्तम्।

४६. व्याख्यातमेतत्।

४७. अग्निं तं मन्ये यो वसुः सूक्तं दशकम्।

५.

१. क्रतुं वक्ष्यामीति शेषः। अनुवचनैकदेशस्य वक्ष्यमाणस्य संज्ञा प्रागाश्विनात्।

२. अथशब्दः क्रमार्थो ऽनुवर्तते। गायत्रमिति संज्ञा चान्वर्था।

३. कस्त उषः कधप्रिय इति तिस्र ऋच एताः।

४. प्रति ष्या सूनरी जनी सप्तकं सूक्तम्।

५. क्रमार्थो ऽथशब्दः। संज्ञार्थं चानुष्टुभमिति।

६. उषो भद्रेभिरा गहि सूक्तं चतुष्कम्।

७. उषस्यमिति वर्तते।

८. उपो रुरुचे युवतिर्न योषेत्यादीनि चत्वारि सूक्तानि। ऊनविंशतिरेताः।

९. उक्तार्थः।

१०. प्रत्यु अदर्शीति सूक्तं षट्कम्।

११. सह वामेन न उषः। षोलशर्चं सूक्तम्।

१२. उक्तव्याख्यानम्।

१३. उषस्तच्चित्रमा भरेति तिस्र ऋचः।

१४. उक्तार्थम्।

१५. एता उ त्या उषसः केतुमक्रतेति चतस्र ऋचः।

१६. उक्तव्याख्यानम्।

१७. महे नो अद्य बोधयेति दशर्चं सूक्तम्।

६.

१. क्रतुमन्वाहेति वाक्यशेषः ।

२. वक्ष्यमाणम् ।

३. अश्विना यज्वरीरिष इत्येवमाद्यास्तिस्र ऋचः ।

४. प्रातर्युजा वि बोधयेत्येतास्तस्र ऋचः ।

५. अश्विनावश्वावत्या एतास्तिस्र ऋचः ।

६. एषो उषा अपूर्व्या पञ्चदशकं सूक्तम् ।

७. गोमदू षु नासत्या एते द्वे ऋचौ ।

८. दूरादिहेव यत्सतो एता ऋचः षट्त्रिंशत् ।

९. उदीराथामृतायते अष्टादशर्चं सूक्तम् ।

१०. आ मे हवं नासत्या नवकं सूक्तम् ।

११. कृतव्याख्यानम् ।

१२. त्रयोविंशत्यृचं सूक्तम् ।

१३. यदद्य स्थः परावतीत्येते सूक्ते दशके । अनूच्येत्येतदनुवर्तत एव ।

१४. कृतव्याख्यानम् ।

१५. आ भात्यग्निरुषसामनीकमिति द्वे सूक्ते पञ्चके ।

१६. नासत्याभ्यां बर्हिरिव प्र वृञ्जे एतानि त्रीणि सूक्तानि । एकषष्टिरेताः ।

१७. वसू रुद्रा पुरुमन्तू वृधन्ता तिस्र ऋचः ।

१८. युवो रजांसि सुयमासो अश्वा इति द्वे सूक्ते । अष्टविंशतिर्ऋचः ।

१९. तं युञ्जाथां मनसो यो जवीयानिति द्वे सूक्ते। द्वादश ऋचः[१]।

२०. ग्रावाणेव तदिदर्थं जरेथे अष्टकं सूक्तम्।

२१. धेनुः प्रत्नस्य काम्यन्दुहाना नवकं सूक्तम्।

२२. क उ श्रवत्कतमो यज्ञियानां द्वे सूक्ते सप्तके।

२३. स्तुषे नरा दिवो अस्य प्रसन्तेति द्वे सूक्ते। अनूच्येति वर्तते। परिहाप्य परित्यज्येत्यर्थः। सं वां शतेत्येतां[२] शकरीमुक्त्वा अन्यां विंशतिमाह।

२४. आ वामित्येवमादीनि पञ्च सूक्तान्यनूच्य एकत्रिंशदेता ऋचः।

२५. उक्तार्थमेतत्।

२६. इमा उ वां दिविष्टय इति षट्कं सूक्तम्।

२७. अयं वां मधुमत्तम इत्यस्य सूक्तस्य प्रथमानुवक्तव्या। ततस्तृतीया। ततः पञ्चमीत्येवं तिस्रः।

२८. उक्तार्थम्।

२९. युवोरु षू रथं हुवे एताः पञ्च।

३०. व्याख्यातम्।

३१. चिष्टिक्तो अद्या भवतं नवेदसा द्वादशर्चं सूक्तम्।

३२. ईळे द्यावापृथिवी पूर्वचित्तये पञ्चविंशकं सूक्तम्।

३३. यो वां परिज्मा सुवृदश्विना रथ इति द्वे सूक्ते चतुर्दशके। घोषा। समानमु त्यत्पुरुहूतमुक्थ्यमिति द्वचं[३] तत्पुचः। एवं सपुत्रायां घोषायामेकत्रिंशत्।

---

१ A om. द्वा॰ऋ॰। २ A ins. पञ्चपदां। ३ B द्वचं सूक्तं C (in marg.) सूक्तं।

२४. उक्तार्थम् ।

२५. प्रति प्रियतमं रथं नवकं सूक्तम् । सह त्रिर्वचनेनैकादश । इति एतदेव प्रातरनुवाकानुवचनम् । आद्यन्तयोस्त्रिर्वचनेन वृद्धिः[१] ।

२६. उत्सृज्य वाचं मध्यमाम् । उत्तमेन स्थानेन[२] प्रति प्रियतममित्यस्योत्तमया परिदध्यात् । अभूदुषा रुशत्पशुरित्याशीर्वत्या परिदधातीति (११.६) श्रुतेः । तस्यां वाचमुत्सृजतीति च ।

२७. परिधानानन्तरमया वाजं देवहितं सनेमेत्येतां द्विपदां जपति ।

२८. इति प्राग्द्विपदायाः सहस्रपरिमाणः[३] प्रातरनुवाकः । संज्ञाकरणं संव्यवहारार्थम् ।

२९. वाशब्दः पक्षान्तरपरिग्रहार्थः । विनापि कामसंयोगम् । एतस्य साहस्रस्य सूत्रोक्तस्य यानि छन्दांसि तेषामपरित्यागेन प्रतिछन्दश्च । प्रतिपत्समारोहणीयानां चाद्यन्तानामित्यर्थः । षष्ठ्यधिकानि त्रीणि[४] शतान्यनुब्रूयात् । तानि च वृद्धैः कल्पितान्युच्यन्ते । तत्र के चिद्द्वौ श्लोकौ पठन्ति । ताविमौ ।

आद्यन्तयोः प्रतिछन्दः सूक्तस्यापि चोभयम् ।
पञ्च सप्तेति[५] यत्तस्माद्द्वादशानुष्टुभान्तसु ॥१॥
अग्निमीळेय ईळिष्व नासत्याभ्यां पुरश्च यत् ।
अश्विना द्वादशोषस्य एवं षष्टिशतत्रयम् ॥

१ C om आद्य॰ वृद्धिः । २ C om स्थानेन । ३ C ॰प्रमाणः । ४ C षष्टिशतानि । ५ A सप्ताद् C सप्ताद् or सप्ताद् B सप्ताद् ।

अन्ये तु दण्डकं पठन्ति। सो ऽप्युच्यते। आपो रेवतीस्त्रिर्व-चनमुपप्रयन्तो नवाग्निमीळे नव तमु त्वा पाथ्यो वृषेति त्रयोदश होताजनिष्टेत्यष्टौ अग्ने कदा त आनुषगिति दश यो मर्त्येष्विति विंशतिरगन्म महेति तिस्रः एना वो अग्निं द्वादशायमग्निः सुवीर्य-स्येति षट् त्वामग्ने मनीषिण इति नवेळिष्वेति त्रिंशत्पुरु त्वेति हवं वेदिषद इति सप्त जनस्य गोपा इति षळग्निं तं मन्य इति दश कस्त उष इति तिस्रः प्रति ष्या सप्तोषो भद्रेभिश्चतुष्कमुपो रुरुच इत्येकोनविंशतिः प्रत्यु अदर्श्यायतीति षट् मह वामेन षोळशोषस्त-च्चित्रमिति तिस्रः एता उ त्या इति चतस्रो महे नो अद्येति दशाश्विना यज्वरीरिष इति तिस्रः प्रातर्युजेति चतस्रः आश्विना-वश्वावत्येति तिस्रः आ मे हवं नवा नो विश्वाभिरिति त्रयोविंशतिः कृष्ठो देवाविति दश भातीति दश नासत्याभ्यामिति पञ्चविंश-तिररतारिष्मेत्येकादश याभिः कण्वमित्येका युवोरु षू रथमिति पञ्च त्रिश्चिन्नो अद्येति द्वादश समानमु त्यं हवं प्रति प्रियतममिति नवोत्तमा त्रिरेवं षष्टिस्त्रीणि च शतानि।

४०. वाशब्दो विकल्पार्थः। ऊर्ध्वं शताच्च शतमेवेत्यभिप्रायः। याथाकामी यजमानः श्रुत्युक्तानां सङ्ख्यानामन्यतमामङ्गीकुर्यात्।

४१. सर्वेषु पक्षेषु पाङ्क्तानि सूक्तानि[1] नोद्धरेत्। विंशोत्तर-शतः प्रातरनुवाक उच्यते। आपो रेवतीः क्षयथा हि वस्व इति तिस्रः उपप्रयन्तो अध्वरमिति नवाग्निमीळे पुरोहितमिति तिस्रः स हि यो मानुषा युगेति चतस्रः ते ते अग्ने त्वोता इत्येका

१ C om. सूक्तानि।

ऋतावानं विचेतसमिति चतस्रः ससस्य यद्वियुता सस्मिन्नूधन्नित्येका स मह्ना विश्वा दुरितानि साह्वानिति द्वे एना वो अग्निं नमसेति तिस्रः स त्वं नो रायः शिशीहीति चतस्रस्त्वामग्ने मनीषिण इति तिस्रः स चन्द्रो विप्र मर्त्य इत्येका वेदिषदे प्रियधामाय सुद्युत इति तिस्रस्त्वामग्ने अङ्गिरसो गुहा हितमित्येका अग्निं तं मन्ये यो वसुरिति दश कस्त उप इति द्वे आ द्यां तनोषि रश्मिभिरित्येका उषो भद्रेभिरा गहीत्येका व्युच्छन्ती हि रश्मिभिरित्येका उषो वाजेन वाजिनीत्येका उषो अद्येह गोमतीत्येका युवतिर्न योषेत्येका अश्वावतीर्गोमतीर्न उषास इत्येका प्रत्यु अदर्श्यायतीत्येका सं नो राया बृहता विश्वपेशसेत्येका उषस्तच्चित्रमा भरेति तिस्रः एता उ त्या उषसः केतुमक्रतेत्येका अधि पेशांसि वपते नृतूरिवेत्येका महे नो अद्य बोधयेति दशाश्विना यज्वरीरिष इत्येका युञ्जाथां रासभं रथ इति तिस्रः आ नो विश्वाभिरूतिभिरित्येका कं यायः कं ह गच्छथ इत्यष्टौ आ भात्यग्निरुषसामनीकमिति नव अश्विनेम यज्ञं पथामुराणा इति तिस्रः इमा उ वां दिविष्टय इति द्वे याभिः कण्वमभिष्टिभिरित्येका युवोरु षू रथं हुव इत्येका शुक्रराणा चिदश्विनेत्येका चिच्चित्रो अद्या भवतं न वेदसेति द्वे अध्वर्यु वा मधुपाणिं सुहस्त्यमित्येका प्रति प्रियतमं रथमित्येकादश एतद्विंशतिशतम्।

त्यजेदनुष्टुभः सप्तशताद्विंशकाद्बुधः।

त्रिष्टुभौ[१] द्वे जगत्येका एवं दशशतं भवेत्॥

---

१ बृहत्यौ A C (in marg.)

सप्तविंशतिशतान्यनुब्रूयादित्यत्रापि वृद्धसंप्रदायो लिख्यते। अर्वन्तस्त्वेत्यतः प्रभृति शतमग्ने इत्येकोनपञ्चाशत् प्र वो यज्ञमिति विंशतिरेवेति प्र होतेति सप्ता नो यातं दिवस्परीति विंशतिर्या वाणेवेत्यूनषष्टिरीळे द्यावापृथिवी पूर्वचित्तय इति पञ्चविंशतिरेतस्मिन् सहस्रादुद्धृते सप्तविंशतिशतानि भवन्ति।

४२. पुरोदयादध्वर्यव उपांशुनाम्नो ग्रहस्य होमकालं संभावयिष्यन्तीति मन्यमानः संख्यादिनियममुत्सृज्यापि परिदध्यात्।

४३. उदिते ऽन्तर्यामग्रहहोम आध्वर्यवः। आ तस्य परिसमाप्तेर्वाग्यमनं होतुः।

७.

१. अप इष्य होतरित्येवमुक्तो ऽध्वर्युणा होता प्र देववेत्येतत्सूक्तं पञ्चदशकं द्वादशीं परिहाप्य वक्ष्यमाणेन क्रमेणानुब्रूयात्।

२. प्र देववेत्यतस्त्रिर्वचनमगणयित्वा[१] नवानूच्य ततो ऽध्वर्युणा[२] आहूतावप्सु ह्रयमानायामेकादशीमनुब्रूयात्।

३. आनीयमानास्वप्सु दशमीमनुब्रूयात्। अप इष्य होतरित्युक्त इति संप्रैषवचनादप्स्विति गम्यते।

४. प्रति यदापो अदृश्रमायतीरिति दृश्यमानासु अप्सु तदाधारेषु सामर्थ्यात्।

५. मैत्रावरुणचमसस्य वसतीवरीणां च संपर्के क्रियमाणे समन्या यन्त्युप यन्त्यन्या इत्येतामनुब्रूयात्।

---

१ Com प्रदेववेत्यतस्। २ Com. ऽध्वर्युणा।

६. आपो न देवीरुप यन्ति होत्रियमित्येतामनुब्रूयात्। होतृचमसे ऽवनीयमानास्वपु।

७. आ धेनवः पयसा तूर्ण्यर्था इत्यनुब्रूयाद्धुविधानमानीयमानास्वपु। आ धेनव इति सूक्तादिप्रदेशात् सूक्तं प्राप्नोति। तन्निवृत्त्यर्थं सर्वामुक्त्वेत्युक्तम्। एकामुक्त्वेत्यर्थः। ऋगन्तेन प्रणवेनावस्येत्।

८. अध्वर्यवैषीरपा ३ इत्यनेन मन्त्रेणाध्वर्युं पृच्छेत्। अभ्यावृत्य तिष्ठन्तमध्वर्युं वचनात्।

९. अध्वर्युः प्रत्याहोतेव नन्नमुरिति।

१०. अध्वर्यवैषीरपा इत्यध्वर्युणा पृष्टेनोतेव नन्नमुरिति प्रत्युक्तमास्वध्वर्यवाधावेत्येवमादिकं निगदं[1] प्रतिपद्यते। निगदग्रहणं यस्य पीत्वा मद इत्यस्या अपि निगदप्रतिपत्त्यर्थम्। तेनाविवाक्ये न संपादनम्। निगदत्वात्।

११. उपविशतीति सूत्रच्छेदः। अम्बयो यन्त्यध्वभिरित्येतां अर्धर्चं चोत्तरस्या उक्त्वा ततः।

१२. उपोत्थाय ततस्तस्मिन्नेव प्रदेशे ऽध्वर्युमन्वावृत्य तदभिमुखः स्थित्वोत्तराम्। कस्याः। अम्बय इत्येतस्या अध्यर्धायाः। ततस्तानो हिन्वन्त्वध्वरमित्यर्धमपो देवीरिति च सकलामेवमध्यर्धामनूच्य।

१३. प्र देवत्रेत्यस्य प्रकृतत्वात् उपोत्तमाम्। तदवस्थ एव यथाब्दात्।

१४. यस्योपोत्तमानूक्ता तस्यैवोत्तमया परिधाय परिसमाप्य प्र देवत्रेत्यादिकमनुवचनं ततः।

---

१ C om. निगद।

१५. पर्यावृत्य प्राङ्मुखः स्थित्वा यत उपोत्थितस्तत्रैवोपविशत्यन्यस्यानुपदेशात्[1]।

८.

१. प्राणं म इत्यादिना मन्त्रेणोपांशुसंज्ञकं ग्रहं हूयमानमनुप्राणिति। अनुनिश्वसितीत्यर्थः।

२. अपानं म इत्यादिना मन्त्रेणान्तर्यामसंज्ञकं ग्रहं हूयमानमन्ववानिति। प्राणमन्तः प्रवेशयतीत्यर्थः।

३. उत्तरेणाहवनीयमन्तर्वेद्येव बहिष्पवमानाख्येन स्तोत्रेण स्तुवते छन्दोगाः। सूत्रारम्भोऽस्य प्रदेशस्यास्तवसंज्ञार्थः। स्तोत्रस्य चास्य बहिष्पवमानसंज्ञार्थः यावच्च स्तुवते तावन्मैत्रावरुण आस्ते। न तूपवेशनप्रसवमात्रम्[2]।

४. ओं स्तुतेति सूत्रान्तः[3]। स्तुवत्सूद्गातृषु दक्षिणतो ब्रह्मा मैत्रावरुणश्चोपविश्य वक्ष्यमाणेन क्रमेण जपप्रसवौ कुरुतः। प्राङ्मुखो मैत्रावरुण उपविशेत् परिभाषितत्वात्। ब्रह्मणो वचनं यजमाननिवृत्त्यर्थम्। स तूद्गातृसमीपे उपविशेत्। औपगात्रं ह्यस्य भवतीति श्रुतेः।

५. ब्रह्मन् स्तोष्यामः प्रशास्तरित्युक्तौ एवमुद्गातृभिर्ब्रह्मा मैत्रावरुणश्चोक्तावनन्तरं कुरुतः।

६. आयुष्मत्य इत्यादिकं प्रसव इत्येवमन्तमेकारान्तं[4] मन्त्रं जपित्वा ततः।

---

१ A C (orig.) अन्यस्मादुपदेशनात्। २ C (in marg.) प्रवेश instead of प्रसव। ३ A om. ओं ॰सूत्रान्तः। ४ B om. एवमन्तम् C om. मन्त्रं।

७. ओं स्तुतेति प्रुतादिना सवनधर्मेणैकस्वर्यमाहतुः।

८. यः पूर्वोक्त आयुमत्य इत्यादिजपपूर्वः ओं स्तुतेत्येष प्रसवः सर्वेषां स्तोत्राणां पारिभाषिकः। ननु अनुक्त एवायं प्रथमदृष्टत्वादितरेषु बुद्धिमानस्येष्यति। नेति ब्रूमः। आनुमानिको बुद्ध्यन्वयः पारिभाषिकेण प्रत्यक्षविहितेन [1]बाध्यते। तदर्थं वचनम्।

९. अमतो मेत्यादिकं स्तुत्योर्मास्तृतं गमयेत्येवमन्तं मन्त्रं यजमानो जपेत्। कस्मिन्नवधौ। पवमानानुपसरिष्यन् पवमानानुपयास्यन्नित्यर्थः[2]।

१०. श्येनो ऽसीत्यादिकं यज्ञस्योदृचमित्यन्तं मन्त्रं यजमानो जपेत्। स्तुते बहिष्पवमाने।

११. सुपर्णो ऽसि पत्वा त्रिष्टुप्छन्दा इत्येवमादिकं मन्त्रं यजमानो जपेत्। स्तुते माध्यन्दिने पवमाने[3]।

१२. सघासि पत्वा जगच्छन्दा इत्येवमादिकं मन्त्रं यजमानो जपेत्। स्तुते आर्भवे पवमाने।

१३. [4]श्येनो ऽसि पत्वा गायत्रच्छन्दा इति निराकाङ्क्षे ऽपि[5] मन्त्रे यो ऽयमन् त्वा रभ इत्यादिक उदर्को ऽभ्यधिक इव मन्त्रः समान इतरयोरपि मन्त्रयोः। व्यूल्हच्छन्दस्यपि दशरात्र एतेषामनूहः। सर्वस्वारादिषु चाविकारः। कुतः। उत्तरयोः पवमानयोश्छन्दोबहुत्वे ऽपि सति सर्वेषामनुपलक्षणात्[6]।

---

१ A बाध्येत। २ C उपयास्यन् पवमानानित्यर्थः। ३ C om. स्तुते माध्यन्दिने।
४ C ins. समान उदर्कः। ५ A निराकाङ्क्षे योरपि मन्त्रे योर्यो ऽयम् C ०काङ्क्षे ऽपि मन्त्रयोर्यो ऽयम्। ६ A C (sec. h.) om. त्वम्।

१४. उपहूता देवा इत्यादिकं मन्त्रं श्रोत्रेण त्वा भक्षयामीत्येवमन्तं स्तुते बहिष्पवमाने होता जपेत् । होतृवचनं यजमानाधिकारनिवृत्त्यर्थम् ।

९.

१. सवनेषु भवः सवनीयः । वपया प्रातःसवने चरन्ति पुरोडाशेन माध्यन्दिने अङ्गैस्तृतीयसवन इति य उक्तः स आग्नेयः कर्तव्यः । एवमेव श्रुतत्वात् ।

२. ऐन्द्राग्नो वा सवनीयः पशुः कार्यः । य एव आलभ्यते तमेतमैन्द्राग्नः स्यादिति हैक आहुरिति श्रुतेः ।

३. ऐकादशिना वा आग्नेयसारस्वतसौम्यपौष्णबार्हस्पत्यवैश्वदेवैन्द्रमारुतैन्द्राग्नसावित्रवारुणाः । एते वा [1]सवनीया भवन्ति । प्रजापतिः प्रजाः सृष्ट्वा रिरिचान (१२. ८) इवामन्यतेत्युपक्रम्य सवनीयप्रकरण एवैकादशिनीपाठात्[2] । वाशब्दातिरेकात् स्तोमायनं वा श्रुत्यन्तराच्च ।

४. एको यूप एषां त इमे एकयूपाः पशवः ऐकादशिना अन्ये वा । तत्रैकयूपेष्वेकादशिनेषु क्रियमाणेषु प्रतिपशु परिव्ययणीया त्रिस्त्रिरावर्तते । प्रतित्रिकं चावसानं भवति । रशनापृथक्त्वात् रशनासंप्रैषपृथक्त्वादित्यर्थः । अथ यद्येकयूप एकादशिनीमालभेरन्पशौपशावेवाध्वर्युः संप्रेष्यति पशौपशावेव युवा सुवासाः परिवीत आगादिति सैव[3] परिधानीया सा परिवीयमाणायेति (१०.२) श्रुतेः ।

---

१ C om. वा । २ B ०शिनीं पाठात् । ३ B C सौषैव ।

५. वक्ष्यमाणो विधिः । ननु एकयूपेष्वैकादशिनेषु क्रमप्राप्तो नाना-यूपेषु भविष्यति । सत्यम् । नैकादशिनेष्वेव । अपि त्वश्वमेधपुरुषमेधा-दिषु यथा स्यादित्येवमर्थं वचनम् ।

६. आहवनीयसंनिधिस्थे[1] परिव्ययणीयामुक्त्वा नवसु यूपेष्व-ञ्जिन्ति त्वेत्येका । उच्छ्रयणीयाः पञ्च । परिव्ययणीया चेत्येताः सप्त । प्रतियूपं नवस्वाह । ननु सप्तैवैताः । अतः सप्तग्रहणं नियमार्थम् । तेन दशमे ऽन्युच्छ्रयस्वेत्यनुष्टुबपि नोद्धर्तव्या ।

७. एकादशे यूपे ऽयं विशेषः । प्राकृते ऽनुवचने यो ऽयमूर्ध्व ऊ षु ण इति बार्हतः प्रगाथस्तमुक्त्वा प्राक् परिधानीयाया याम्नो नरो देवयन्तो निमिम्युरिति सूक्तशेषमुत्तमावर्जमन्वाह ।

८. द्वादश उपशयो भवति[2] । वितष्ठ इति निर्ज्ञाते[3] आध्वर्यवे । तं परिसमाप्ते एकादशस्यानुवचने उत्तमयानुमन्त्रयते । वनस्पते शतवल्श इत्येतया ।

९. पूर्वेद्युरप्युच्छ्रयणमध्वर्युवशाद्भवति । तत्र मध्यमस्य परिव्यय-णान्तं[4] नित्यमेव । दक्षिणोत्तराणां यूपानां परिव्ययणवर्जं कर्म । तादृशे ऽध्वर्युभिः क्रियमाणे पूर्वया परिदध्यात् ऊर्ध्वा न इत्येतया ।

१०. संतानो ऽनुवचनाविच्छेदः । स यस्याभिप्रेतः स संतानार्थी होता । सो ऽर्धर्चेनेव काङ्क्षेत् । वाशब्द उत्तरसूत्रप्रयोजनः । एव-कारकरणमिष्टतरो ऽयं पक्ष इति ज्ञापनार्थम् ।

---

१ A B C चषालौघे । २ A ins. उप एकादश यूपानां समीपे शेषं प्रयाजधर्मेण निहन्तीत्युपशयः । स त्वयूपः तत्र चात्वाले पशुरित्यनुमन्त्रयते । ३ C विनिष्ठ A वंशान । ४ B ०णमानाम्नं A ०णानाम्नं ।

११. वाशब्दो विकल्पार्थो ऽनुवर्तते। समानजातीयानुसमयः कर्तव्यः। कथम्। सर्वेषामञ्जनीयाः सर्वेषामुच्छ्रयणीयाः सर्वेषां परिव्ययणीया इति।

१२. केषां चिदध्वर्यूणां यूपेभ्यो ऽव्यमानेभ्यो ऽनुब्रूहीत्यूहेन संप्रैषः। तत्रानुवचनमेकादशे ऽन्तरेण परिव्ययणीयां प्रगाथं च याभ्यो नर इति च सूक्तशेषमन्वाहेति। यथैकादशे तथोहेनेति वक्तव्ये तुल्यार्थतामेकादशग्रहणस्योत्तमग्रहणस्य च दर्शयति। तेन यदेकादश उक्तं तदुत्तमे यूपे ऽश्वमेधपुरुषमेधयोरपि सिद्धं भवति।

१३. सवनपशुदेवतामावाह्य वनस्पतिं च। विदेशस्थयागेष्वपि प्रजापत्यादिष्वयमेवावाहनक्रमो[१] वचनात्।

१४. इन्द्रं वसुमन्तमित्याद्याः सवनदेवताः। तथा चैव श्रुतत्वात्। अतो यत्राप्यन्यदेवत्यानि सवनानि तत्राप्यूहः सिद्धो भवति। [२]अनिरुक्तसवनचोदनायामावाहने ऽप्यनिरुक्तता।

१५. कात्यायने व्यूहदर्शनात्। पशुदेवताप्रयुक्तं सवनदेवतानामपि भवतीति। तदाशङ्कानिवृत्त्यर्थं। स्विष्टकृत्सूक्तवाकप्रैषेषु[३] प्रतिषेधः।

१६. सूक्तवाके विकल्पः। यादृशं प्रकृतौ निगमनं हविरजुषतहविरजुषतेति तादृशं सवनदेवता लभन्ते। निगच्छन्तीति वचनात्। इन्द्रो वसुमान्त्सवनमजुषतेति हि स्यात् सवनभाक्त्वात्।

---

१ C यत्र instead of यत्र। २ A अनिरुक्तसवन॰ B ॰रुक्तसवन॰। ३ A B स्विष्टकृत्सूक्तवाकप्रैषयजमानप्रतिप्रैषेषु (B ॰वाके)।

१७. अध्वर्यू संस्पृश्य वपश्रोर्वीरिति जपित्वा प्रचारानुपूर्व्येण[1] वक्ष्यमाणके प्रहृताहुत्याख्ये आहुती जुहोति[2]।

१८. जुष्टो वाच इत्यादिना सरस्वत्या इत्येवमन्तेन मन्त्रेण पूर्वाहुतिं जुहोति। यदा मुख्यः कुर्यात्परार्थानीति मुख्यो द्वियजमानके जुहोति। बहुयजमानके वा। तदा यथार्थमूहः। स उच्यते। जुष्टौ वाचो भूयास्व जुष्टौ वाचस्पतेरिति द्वियजमानके। जुष्टा वाचो भूयास्म जुष्टा वाचस्पतेरिति बहुयजमानके। नान्ते स्वाहाकारः कृतत्वात् पुरस्तात्स्वाहाकारेणेति च श्रुतौ मन्त्रविशेषणात्।

१९. उत्तरामाहुतिममन्त्रिकां जुहुयात्।

१०.

१. अग्ने नय सुपथा राये अस्मानित्याग्नेयस्य पशोर्वपायाः पुरोनुवाक्या। अग्ने त्वं पारया नव्यो अस्मानिति पशुपुरोळाशस्य पुरोनुवाक्या। अग्ने त्वमस्मद्युयोध्यमीवा इति पशोः पुरोनुवाक्या। एवमेतास्तिस्रः। वक्ष्यति। तिस्रस्तिस्रः पूर्वा पुरोनुवाक्या वपायाः पुरोळाशस्य पशोरिति। तत्र तावत्पुरोनुवाक्या उक्ताः। भुवो यज्ञस्य रजसश्च नेतेति वपाया याज्या। प्र वः शुक्राय भानवे भरध्वमिति पशुपुरोळाशस्य याज्या। प्र कारवो मनना वच्यमाना इति पशोर्याज्या। वक्ष्यति। तिस्रस्तिस्र उत्तरा याज्या इति। एवं सर्वेषु षट्केषु योज्यम्।

---

१ C om. अध्वर्यू॰ पूर्वेण। २ A C (sec. h., and also in the text of the Sûtra जुहुति।

२. आ नो दिवो बृहतः पर्वतादा। सरस्वतीं देवयन्तो हवन्ते। सरस्वत्यभि नो नेषि वस्यः। पावीरवी कन्या चित्रायुः। प्र क्षोदसा धायसा सस्र एषा। इमा जुह्वाना युष्मदा नमोभिः। इत्ययं षट्कः सारस्वतस्य।

३. त्वं सोम प्र चिकितो मनीषा। त्वमिमा ओषधीः सोम विश्वाः। सोमो धेनुं सोमो अर्वन्तमाशुम्। या ते धामानि दिवि या पृथिव्याम्। अषाळ्हं युत्सु पृतनासु पप्रिम्। या ते धामानि हविषा यजन्ति। एता षट् सौम्यस्य।

४. पूषेमा आशा अनु वेद सर्वाः। प्रपथे पथामजनिष्ट पूषा। पथस्पथः परिपतिं वचस्या। शुक्रं ते अन्यद्यजतं ते अन्यत्। यास्ते पूषन्नावो अन्तः समुद्रे। पूषा सुबन्धुर्दिव आ पृथिव्याः। इति षट्कं पौष्णस्य।

५. आ दैव्या वृणीमहे ऽवांसि। आ वेधसं नीलपृष्ठं बृहन्तम्। बृहस्पतिः समजयद्वसूनि। स हि शुचिः शतपत्रः स शुन्ध्युः। स सुष्टुभा स ऋक्वता गणेन। स आ नो योनिं सदतु प्रेष्ठः। इत्येताः षड् बार्हस्पत्यस्य।

६. विश्वे अद्य मरुतो विश्व ऊती। यं देवासो ऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः विश्वे देवाः शृणुतेमं हवं मे। ये के च ज्मा महिनो अहिमायाः। ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे। स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा। एताः षड् वैश्वदेवस्य।

७. इन्द्रं नरो नेमधिता हवन्ते। इन्द्रो राजा जगतश्चर्षणीनाम्।

इन्द्र क्षत्रमभि वाममोजः। उरुं नो लोकमनु नेषि विद्वान्। आ नो विश्वाभिरूतिभिः सजोषाः। आ ते शुष्मो वृषभ एतु पश्चादिति षडैन्द्रस्य।

८. गोमदश्वावद्रथवत्सुवीरम्। इये नरो मरुतो मृळता नः। शुची वो हव्या मरुतः शुचीनाम्। अरा इवेदचरमा अहेव। या वः शर्म शशमानाय सन्ति। यूयमस्मान्नयत वस्यो अच्छ। एता षण्मारुतस्य।

९. उभा वामिन्द्राग्नी आहुवध्यै। आ वृत्रहणा वृत्रहभिः शुष्मैः। ता योधिष्टमभि गा इन्द्र नूनम्। शुचिं नु स्तोमं नवजातमद्य। गीर्भिर्विप्रः प्रमतिमिच्छमानः। प्र चर्षणिभ्यः पृतनाहवेषु। एता षडैन्द्राग्नस्य।

१०. आ नो देवः सविता त्रायमाणः। आ देवो यातु सविता सुरत्नः। सविता यन्त्रैः पृथिवीमरम्णात्। वाममद्य सवितर्वाममु श्वः। ये ते पन्थाः सवितः पूर्व्यासः। अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्याः। एता षट् सावित्रस्य।

११. अस्तभ्नाद् द्यामसुरो विश्ववेदाः। तत्त्वा यामि ब्रह्मणा वन्दमानः। अव ते हेळो वरुण नमोभिः। एवा वन्दस्व वरुणं बृहन्तम्। इमां धियं शिक्षमाणस्य देव। उदुत्तमं वरुण पाशमस्मत्। एताः षड्वारुणस्य।

१२. एता ऋचो याज्यानुवाक्या ऐकादशिनानां भवन्ति।

१३. न केवलमैकादशिनानामेवैते यज्ञाः किं तर्हि अन्येषामप्येवंदेवतानां पशूनाम्। नेष्टिष्वेवंदेवतास्वपि। पशव इति वचनात्।

११.

१. इन्द्रा नु पूषणा वयमित्याद्या ऐन्द्रापौष्णस्य पशोः षड् भवन्ति।

२. सोमा पूषणा जनना रयीणामित्येताः षट् सोमापौष्णस्य पशोः।

३. सं वां कर्मणा समिषा हिनोमीत्येताः षळैन्द्रावैष्णवस्य पशोः।

४. नासत्याभ्यां बर्हिरिव प्र वृञ्जे। षळेता आश्विनस्य पशोर्भवन्ति।

५. विष्णोर्नु कं वीर्याणि प्र वोचम्। एताः षड्वैष्णवस्य पशोः।

६. रात्री व्यख्यदायती। एताः षड्राज्या भवन्ति। रात्रिदेवत्यस्य पशोः।

७. भूरिं द्वे अचरन्ती चरन्तम्। एताः षड् द्यावापृथिवीयस्य पशोः।

८. जनीयन्तो न्वग्रव इत्येतास्तिस्रः। स वावृधे नर्यो योषणासु। दिव्यं सुपर्णं वायसं बृहन्तं। यस्य व्रतमिति च षष्ठी खैलिका। एताः षट् सरस्वतः। सरस्वान्नाम देवताविशेषस्तस्य।

९. य इमा विश्वा भुवनानि जुह्वदित्येताः षट् चतुर्थीं परिहाप्य वैश्वकर्मणस्य पशोर्भवन्ति।

१०. आ ते पितर्मरुतां सुम्नमेतु। एताः षड् रौद्रस्य पशोः।

११. अहं रुद्रेभिर्वसुभिश्चरामीति वाग्देवत्यस्य पशोरेताः षड् भवन्ति।

१२. उक्तानां यद्भाणामयं विनियोगः। सूत्रोक्तेन क्रमेण प्रति-

यष्टुं तिस्रस्तिस्रः पूर्वाः पुरोनुवाक्याः कर्तव्याः। एका वपायाः। एका पशुपुरोडाशस्य। एका पशोः। एवमेव तिस्रस्तिस्र उत्तरा याज्याः।

१३. सवनीयस्य पशोः केचित्पशुपुरोडाशं न कुर्वन्ति तुल्यत्वादुपालम्भ्यस्यापि।

१४. करणं पशुपुरोडाशस्येत्येष एव न्यायः। कुतः। सोमार्थैः सवनीयहविर्भिः पश्वर्थस्य निवृत्तिरन्याय्येति।

१५. सावित्रस्य वाग्देवत्यस्योपांशु भवतः। न केवलं प्रदेशान्तरोक्तौ सौर्यप्राजापत्यौ।

१६. पशुगणे प्रतिपशु मनोतासूक्तमावर्तते कालभेदात्।

१७. प्रातरनुवाकादि प्रातःसवनम्। तस्मिन्प्रातःसवने परिव्ययणीयादि वपान्तं पाशुकं कर्म कृत्वा[1] यथाप्रपन्नमुपनिष्क्रम्याग्नीषोमीयवदुपस्पृश्य चात्वाले[2]। प्राप्तस्यानुवादः क्रमार्थः।

१२.

१. वक्ष्यमाणेन विधिना धिष्ण्यान्वक्ष्यमाणानुपस्थाय सदः प्रविशन्ति। होता मैत्रावरुणो ऽच्छावाको ग्रावस्तुत् ब्रह्मा ब्राह्मणाच्छंसी पोताग्नीध्रः सदस्यो यजमानश्च। युगपच्छाखान्तराद्वक्रवचनाच्च। स्वशाखायां तु ते समन्विता होतारमतिसृजन्त इति होतैवोपस्थाता।

२. अग्रेण हविर्धाने तिष्ठन्तो नोपस्थेयसमीपं गत्वा तंतमीक्षमाणा अन्यदिङ्मुखा अपि। न केवलं प्राङ्मुखा उदङ्मुखा वा।

---

१ C om. कृत्वा। २ C ins. मार्जयन्।

३. यथाजमीत्येवमादिना मन्त्रेणाहवनीयमुपतिष्ठन्ते ।

४. उदर्को ऽनुषङ्ग इत्येको ऽर्थः । रौद्रादिर्मन्त्रगणेषु उत्तरेष्वप्य-नुषक्तव्यः । तान्सदः प्रसर्प्स्यन्नमस्यति नमो नम इति (१२.१) श्रुतेः ।

५. अननुषक्तो वा शाखान्तरात् ।

६. अपिजो ऽसि दुवस्वानित्यनेन मन्त्रेणोपतिष्ठन्ते । यो[1] ऽग्निराहवनीये मथित्वानुप्रहृतः ।

७. परिषद्यो ऽसि पवमान इत्यनेन मन्त्रेणास्तावमुपतिष्ठन्ते । आस्ताव उच्यते यत्र बहिष्पवमानेन छन्दोगाः स्तुवते ।

८. प्रतक्वासि नभस्वानित्यनेन मन्त्रेण चात्वालमुपतिष्ठन्ते ।

९. कव्यो ऽसि हव्यसूदन इत्यनेन मन्त्रेण पशुश्रपणमुपतिष्ठन्ते ।

१०. समुद्रो ऽसि विश्वभरा इत्यनेन मन्त्रेण उत्करमुपतिष्ठन्ते ।

११. दक्षिणावृतो भूत्वा विभूरसि प्रवाहण इत्यनेन मन्त्रेणाग्नीध्रमुपतिष्ठन्ते ।

१२. सदश्चाग्नीध्रं च प्रविशन्तो यथाकालं तयोरेवोपरि द्वारस्थूणाविशाखस्थं वलीकाद्यभिमृशन्ति दिवस्पृष्ठमसीत्येवमादिना मन्त्रेण ।

१३. ऋतस्य द्वारावित्येवमादिना मन्त्रेणोभाभ्यां हस्ताभ्यां द्वार्यौ संस्पृश्य प्रविशेयुः ।

१४. आग्नीध्रीयं प्रविश्योत्तरेणाग्निं गच्छन्ति । ये सदः[2] प्रविष्टाः सन्तः प्रत्यञ्चो धिष्ण्यानतिक्रामन्ति । के पुनस्ते । यजमानग्रावस्तुत्सदस्यवर्जिताः । तेषां संचरं वक्ष्यति अग्रेणोत्तरेण सर्वान् धिष्ण्यान्गच्छन्तीत्येवमादिना ग्रन्थेन ।

---

१ B ०मिश्चानो ऽग्निरा० । २ B सद ।

१५. मलिम्लुचो ऽसीत्येवमादिना मन्त्रेणाग्नीध्रादमच्छावाकस्योपतिष्ठन्ते। तं च वक्ष्यति। अच्छावाकः सीदेत्युक्तो ऽग्रेण सद उत्तरेण स्रुतिमुपविश्यति।

१६. वह्निरसीत्यादिना मन्त्रेण होतृधिष्ण्यमुपतिष्ठन्ते। धिष्ण्यग्रहणं सदोऽधिकारनिवृत्त्यर्थम्[1]।

१७. धिष्ण्याधिकारो ऽनुवर्तते। स्वाचो ऽसि इत्यादिना मन्त्रेण मैत्रावरुणधिष्ण्यमुपतिष्ठन्ते।

१८. तुथो ऽसीत्यादिना मन्त्रेण ब्राह्मणाच्छंसिनो धिष्ण्यमुपतिष्ठन्ते।

१९. उशिगसीत्यादिना मन्त्रेण पोतृधिष्ण्यमुपतिष्ठन्ते।

२०. अवस्युरसीत्यादिना मन्त्रेण नेष्टृधिष्ण्यमुपतिष्ठन्ते।

२१. अंहारिरसि बम्भारिरित्येवमादिना मन्त्रेणाच्छावाकधिष्ण्यमुपतिष्ठन्ते।

२२. शुन्ध्युरसि मार्जालीय इत्यनेन मन्त्रेण मार्जालीयमुपतिष्ठन्ते। तत्रैव स्थिता अवेक्ष्येत्यारम्भात्।

२३. शुन्ध्युरस्युपसद्य इत्यनेन मन्त्रेण ब्रह्मसदनमुपतिष्ठन्ते। अवेक्ष्यैव। तत्रैव स्थिताः।

२४. ऋतधामासि स्वर्ज्योतिरित्यनेन मन्त्रेणौदुम्बरीम्। अवेक्ष्योपतिष्ठन्ते। तत्रैव स्थिताः।

२५. समुद्रो ऽसि विश्वव्यचा इत्यनेन मन्त्रेण सद उपतिष्ठन्ते। तत्रैव स्थिताः। अन्तर्बहिश्चानुवीक्ष्य।

---

१ C •मसचंमाग्नाद्रोधिकार•। alt to •मचचं सदो A •माग्नाधिकार•।

२६. अजो ऽस्येकपादित्यनेन मन्त्रेण[1] शालामुखीयमुपतिष्ठन्ते। पत्नीशालासंनिधिस्थाः ।

२७. अहिरसि बुध्न्य इत्यनेन मन्त्रेण प्राजहितमुपतिष्ठन्ते । प्राजहितश्चिरंतनो गार्हपत्यः ।

२८. अन्नदास्थान्नपतिरित्यनेन मन्त्रेण व्रतश्रपणमुपतिष्ठन्ते । व्रतश्रपणो दक्षिणाग्निः। मन्त्रेषु केषां चित्शालागार्हपत्यव्रतश्रपणाः। तेषां यथास्वमुपस्थानमृत्हो वा। अहयः स्थ बुध्न्याः। अन्नदाः स्थान्नपतय इति ।

१३.

१. अग्नयः सगरा इत्येवमादिना मन्त्रेण सर्वान् धिष्ण्यानुपतिष्ठन्ते। सदसः पुरस्तात्तिष्ठन्तः। तत्र हि बहवो दृश्यन्ते। भूयसां साधर्म्यात् ।

२. अध्वन इत्यादिना पथि स्तादित्येवमन्तेन मन्त्रेणादित्यमुपस्थायानन्तरम् ।

३. मैत्रावरुणपूर्वा उदञ्च इति येषामग्रेणोत्तरेण सर्वान्धिष्ण्यान्गच्छन्तीति संचर उक्तस्ते निर्दिश्यन्ते । अतश्च मैत्रावरुणप्रभृतयो धिष्ण्यवन्त इत्युक्तं भवति। अच्छावाकं परिहाप्येति वदता[2] यावस्तुतः प्रवेशः साधितो भवति। पूर्वया द्वारा सद इति वचनादाग्नीध्रः स्वमागारं दक्षिणया द्वारा संसृज्य पूर्ववत्सदः प्रविशेत्[3] ।

---

१ B मन्त्रेण शाला तन्निधिस्थाः। २ B पूर्वयानिवदता C (in marg.) वचनात्। ३ B om. सदः।

४. सदः प्रसर्पन्तीति वर्तते । विश्वे देवा अनु मा प्रसर्पत इति मन्त्रः । प्रतीकग्रहणात्तिस्र ऋचो जपन्तः सदः प्रसर्पन्ति ।

५. अच्छावाकधिष्ण्यं यावदग्रेण ततस्तान्सर्वानुत्तरेण । एवं गच्छतां दक्षिणधिष्ण्योदक्षिणधिष्ण्यः पूर्वो गच्छेत् ।

६. गत्वा स्वधिष्ण्यप्रदेशं दक्षिणधिष्ण्योदक्षिणधिष्ण्यः स्वस्य स्वस्य धिष्ण्यस्य पश्चादुपविशेत् ।

७. द्वितीयं सदोग्रहणं सदःप्रवेशधर्मप्रापणार्थम् । शिष्टं निगदव्याख्यातम् ।

८. एते ये प्रविष्टास्ते नासमाप्ते सवने पश्चिमेन द्वारेण निःसरन्ति[1] श्रुत्यन्तरवचनात् ।

९. अविद्यमानधिष्ण्यानामन्तरेण होतृधिष्ण्यं मैत्रावरुणधिष्ण्यं चासमाप्ते सवने संचरो भवति । प्राग्गतिषु ब्रह्मणो ऽपरया द्वारा प्रविष्टत्वात् । प्रत्यग्गतिष्वितरेषां पूर्वया द्वारा प्रविष्टत्वात् ।

१०. सदस्यन्यत्र वा ये धिष्ण्यवन्तस्तेषां स्वं स्वं धिष्ण्यमुत्तरेणाग्नीध्रस्य प्राग्गतिषूत्तरेण स्वं धिष्ण्यं प्रत्यग्गतिष्वपरेण ।

११. यद्यधिकृताः स्वकार्येणोदञ्चो गच्छेयुः पश्चार्धेनाग्नीध्रीयस्य गच्छेयुः । स्वरुच्योदग्गच्छतामेष विसंस्थितसंचरः ।

१२. [2]दक्षिणा चेद् व्रजेयुर्मार्जालीयस्य पश्चार्धेन वा व्रजेयुः ।

१३. येनैव मार्गेण गतास्तेनैवाव्यावर्तमानाः प्रत्यायन्ति । पश्र-द्वादविलम्बितम् ।

---

१ A C (orig.) निःसंचरन्ति । २ B om. दक्षिणा C (sec. h.) del. चे ।

१४. ऊर्ध्वं प्रातःसवनात्प्रसर्पणमुच्यते तत्र समस्तोपस्थानप्रभृतिनाग्नयः सगरा इत्यादिना यथोक्तेन मन्त्रकर्मकलापेन[1] प्रसर्पन्ति।

१५. यदाध्वर्युराह प्रशास्तः प्रसुहीत्यों सर्पतेति प्रशास्ता चाहेति संप्रैषवशात्संसर्पेषु च्छन्दो (०) गेषु स्तुत्वा चोत्तमग्निमुपयन्तीति च श्रुतिदर्शनात् प्राप्तस्य समस्तोपस्थानप्रभृतेरादित्योपस्थानं रात्रिपर्यायाग्निनयोः प्रतिषिध्यते। अन्यत्र दैवात्मानुयाद्वा प्रतिवचनात्। कालोत्कर्षे त्वस्तमिते ऽप्यादित्योपस्थानं प्राप्त्यर्थम्। तत्र हि प्राण उपस्थेयो यदयं[2] प्राणो ऽध्यात्ममित्यर्थवादात्।

द्विरभ्यासो ऽध्यायपरिसमाप्तौ शिष्टाचारस्तदाचरणं चायुष्यमिति।

इति शाङ्खायनश्रौतसूत्रभाष्ये षष्ठो ऽध्यायः समाप्तः।

शाङ्खायनकसूत्रस्य समं शिष्यहितेच्छया।
वरदत्तसुतो भाष्यमानर्तीयो ऽकरोन्नवम्[3]॥

---

१ A om. कर्म। २ B प्राणायाम॰ A इत्याद्यय॰। ३ Om. in A C.

अथ सप्तमो ऽध्यायः।

१.

१. श्रुतिक्रमेण सदःप्रसर्पणादनन्तरं सवनीयपुरोडाशप्रचारमाह। प्रसृप्येति प्रसर्पणानुवादः परिभाषासूत्रैर्व्यवहितत्वात्। प्रातःसवनसवनीयाङ्गार्थः प्रसर्पणस्यानुवाद इति वृद्धसंप्रदायः। अथ हविष्पङ्क्त्या चरन्ति पशवो वै हविष्पङ्क्तिः पशूनामेवाप्त्यै तानि वै पञ्च हवींषि भवन्ति दधि धानाः सक्तवः पुरोडाशः पयस्येति (१३.१) श्रुतेः। एवंरूपेष्वपि हविःषु पुरोडाशैरित्युक्तं पौर्णमासीविकारार्थम्। सवनीयसंज्ञाकरणं शास्त्रसंव्यवहारार्थम्।

२. धानावन्तं करम्भिणमिति पुरोनुवाक्या भवति। वैश्वामित्रीरनुसवनमित्यादिश्रुतेः (२८. २)।

३. होता यक्षदिन्द्रं हरिवाँ इत्यादिको ऽनुसवनं सवनीयपुरोडाशानां प्रैषः। अनुसवनमिति प्रसङ्गमुपजीवता लाघवार्थमिहैवोक्तं। तैत्तिरीयाणामितरयोरपि सवनयोः पयस्यास्ति। तदुपलक्षणप्रतिषेधार्थं यथासमाम्नातवचनम्।

४. सवनीयहविःप्रैषस्य यथासवनमभिदधत्प्रयोगं करोति। वक्ष्यत्युत्सर्गिणामयने (१३. २०) यद्देवतो वा सवनीयः स्यात् तच्च पश्चात्तन्त्रे हवींष्यन्वायातयन्तीति। तत्र सवनपदानां सविशेषणानामुत्सर्गः कथं नाम स्यात्। सवनाभावादित्येवमर्थं सूत्रम्।

५. तादृशेनैवानुसवनं यथासवनाभिधायिना प्रैषेण यजति । किमविशेषेण । नेत्युच्यते । उद्धृत्य होतायक्षदित्येवंशब्दमुद्धृत्य होतर्यजशब्दं च । इन्द्रमित्यस्य देवतादेशनस्योद्धारः । संप्रैषे तु न विद्यत इति परिभाषितत्वात् (१. २. २०)। उद्धृत्यादेशपदमिति (५. ४. ४) चाश्वलायनस्यासंदिग्धमादेशपदमेतत् ।

६. सवनीयहविःस्विष्टकृतो वैश्वामित्रीरनुसवनमित्याद्यविशेषश्रुतेः ।

७. होता यक्षदग्निं पुरोळाशानामित्येवमादिकः सर्वेषु सवनेषु हविष्पङ्क्त्यां स्विष्टकृत्प्रैषो भवति ।

८. अनुसवनमेव चशब्दात् । समानमन्यत्प्रातःसवनेनेति सिद्धेऽनुसवनवचनं[1] नियमार्थम् । ततो यत्रापि पशुपुरोळाशस्य सवनीयानां च समानः स्विष्टकृत्तत्राप्येष एव प्रैषो याज्या च[2] । अवचने तु न स्यात् । पुरोळाशस्विष्टकृत्समवायेऽपि इति (५. १८. ३) वचनात् ।

२.

१. ऐन्द्रवायवस्य मैत्रावरुणस्य द्वौ ग्रहयागौ[3] आश्विनस्य तृतीय इत्येते द्विदेवत्यसंज्ञा अनेनैव क्रमेण सवनीयपुरोळाशानन्तरं भवन्ति।

२. माधुच्छन्दसावभिरूपे द्विदेवत्यानां प्रथमस्य पुरोनुवाक्ये अश्वाहेति (२८. २) श्रुतेः ।

३. होता यक्षद्वायुमग्रेगाः । होता यक्षदिन्द्रवायू अर्हन्तेत्येवमादिकौ प्रैषौ ।

---

१ C om. सवन । २ C च । प्रैषो याज्यावचनं चि स्यात् । पुरोळा॰ । ३ C द्वौ ग्रहौ याजावाश्वि॰ ।

४. अयं पिबा मधूनाम्। अतेना नो अभिष्टिभिः। एते याज्ये भवतः। श्रुत्यन्तरात्।

५. गार्त्समदौ च मैधातिथौ चोत्तरयोरभिरूपे अन्वाहेति श्रुतेः (२८. २)।

६. होता यक्षन्मित्रावरुणेत्येवमादिकः प्रैषो (०) भवति।

७. श्रुत्यन्तरात्।

८. प्रातर्युजा वि बोधयेत्याश्विनस्य पुरोनुवाक्या। मैधातिथीं चेति श्रुतेः।

९. होता यक्षदश्विना नासत्येत्येवमादिकः प्रैषो भवति।

१०. वावृधाना शुभस्पती इति याज्या। श्रुत्यन्तरात्।

११. द्विदेवत्यानामयं वैशेषिको धर्मः।

१२. तस्मादनवानं यजतीति (१३. ५) श्रुतेः।

१३. इतरयोरसंभवात् ऐन्द्रवायवग्रहणं नियमार्थम्। तेनोत्तरयोः षष्ठे ऽप्यहनि न द्वौ द्वौ प्रणवौ। ऐन्द्रवायवस्य च द्वावेव न चत्वारः।

१४. ऐन्द्रवायवस्यैव नानावषट्कारे एव। अतश्च षष्ठे ऽप्यन्यस्यैन्द्रवायवस्य द्वौ वषट्कारौ पात्रकेण्योस्तद्यदाभिसादयन्नं वषट्कुर्वन्तीति श्रुतिज्ञापकम्। इतरयोरप्येकैको वषट्कारः। एतदेव ज्ञापकम्।

१५. वषट्कारद्वित्वे ऽपि सति पुरस्तात्प्रणवो येयजामहो ऽनःसवः सकृदेव।

३.

१. ऐतु वसुः पुरूवसुरित्यनेन मन्त्रेण ऐन्द्रवायवमध्वर्युहस्ताद्गृहीत्वापोर्णुत्य[1] दक्षिणमूरुं तस्मिन्निदध्यात्। निहितानां चाच्छादनमवेक्षणं च न कुर्यादा प्रतिभक्षितस्य ग्रहस्य निनयनात्[2]।

२. ऐतु वसुर्विददसुरित्यनेन मन्त्रेण मैत्रावरुणं प्रतिगृह्य तं दक्षिणेनैन्द्रवायवं नीत्वा तस्य दक्षिणतःपश्चान्निदधाति[3]।

३. ऐतु वसुः संयद्वसुरित्यनेन मन्त्रेणाश्विनं प्रतिगृह्य तं दक्षिणेन पूर्वावैन्द्रवायवमैत्रावरुणौ नीत्वा तयोरेवोत्तरतःपश्चान्निदधाति। संलग्नान्निदध्यात्। अभिधानत[4] इवाभित इति (१२.५) श्रुतेः। तानवष्टभ्यास्ते नेत्प्रवर्तन्ता इति श्रुतेः। स्वयं धारयेत्। अप्रवर्तनपरत्वादन्यो ऽपि वा धारयेत्।

४. याः सोमद्रव्यसंबन्धेन याज्या विधीयन्ते तासु सर्वासु सोमस्याग्ने वीहीत्यनुवषट्कारसंज्ञको मन्त्रो याज्यात्वेन भवति। अन्वर्थसंज्ञा चेयं वषट्कारमनुभवतीति। न संप्रैषमपेक्षत इत्यर्थः। यथाप्युक्तम्यजा यज सोमानामिति संप्रैषस्तत्रापि सोमस्याग्ने वीहीत्येकवचनमेव। सर्वग्रहणात्। द्विदेवत्यादीन्परिहाप्य। नानुवषट्करोतीति श्रुतेः[5]।

५. अग्नीत्पात्नीवतस्योपांशु यज। माचा[6] तु याचीरिति तैत्तिरीयाणां संप्रैषः। तत्र प्रतिषेधो ऽन्यत्र विकल्पः।

---

१ A C प्रोर्णुत्य। २ B प्रतिभक्षितस्यावनयात्। ३ B has मटरीत्वा तस्यैव दक्षिणापरे प्रदेशे चरावयं निदधाति instead. C has ऐतु •दधाति in marg. in the text: स्वष्टमेतत्। ४ B C अभिधानतर। ५ A C तत्रतत्र श्रुतेः। ६ B C माचा नू A माच तु।

४.

१. उन्नीयमानेभ्यश्चमसेभ्य इत्युक्त उन्नीयमानसूक्तमा त्वा वहन्तु हरय इत्येतत्। ता वै नवान्वाह नव ह्येता अत्र चमसानुन्नयन्तीति (२८. २) श्रुतेः। ननु हैके प्रातःसवन उन्नीयमानेभ्यो ऽन्वाहुरिन्त्ययं पक्षो नेष्टः सूक्तवचनात्। संप्रैषपाठः क्रमार्थः।

२. होता यक्षदिन्द्रं प्रातः प्रातःसावस्येत्येवमादिकं प्रैषं मैत्रावरुणो ऽन्वाह। पूर्वं चानुवचनम्[१]। परिभाषितत्वात्।

३. इदं ते सोम्यं मध्विति प्रस्थितानां याज्येति (१३. ६) श्रुतेः।

४. नृचक्षसमित्येवमादिना मन्त्रेण होतृचमससंज्ञकं चमसं होता प्रतीक्षते।

५. वयोधसमित्येवमादिना मन्त्रेण प्रकृतं होतृचमसं प्रतिगृह्णीयात्।

६. प्रकृतं होतृचमसमसुरः संस्पर्शयेद्विदेवत्यांश्चोरुस्याम्।

७. पूर्वमुन्नीयमानसूक्तेनानूच्यमानेन ये चमसा उन्नीतास्ते सर्व एव वषट्कारेण हुताः। ततश्चत्वारः सद: प्रवेशिताः। होतृब्रह्मोद्गातृयजमानचमसाः। शिष्टानां पुनरुन्नीतानां वक्ष्यमाणा होत्रकसंज्ञका यजन्ति।

८. मित्रं वयं हवामह इत्येतया मैत्रावरुणो यजति।

९. इन्द्र त्वा वृषभमित्येतया ब्रह्मपुरुषो ब्राह्मणाच्छंसी होत्रको यजति।

---

१ B °वचनम्।

१०. ब्रह्मपुरुष एव होचकः पोता मरुतो यस्य हि क्षय इत्येतया यजति।

११. नेष्टाध्वर्युपुरुषो होचकः। ग्नो ऽग्ने पत्नीरित्येतया यजति।

१२. उक्षान्नाय वशान्नायेत्येतयाग्नीध्रो ब्रह्मपुरुषो होचको यजति।

१३. अयाळग्नीदित्येतस्मिन्नध्वर्युणोक्ते ऽयाळित्याग्नीध्रो ब्रूयात्। ननु कथमेतज् ज्ञायते ऽध्वर्युणोक्त इति। उच्यते। उत्तरसूत्रे होतृवचनात्।

१४. स भद्रमित्यादिकं सवनधर्मेणाह होता।

१५. सोमभक्षपरिभाषेयम्। अनारभ्य किंचिदुच्यते। उत्क्षिप्य सोमपात्रं प्राग्भक्षणात्। भक्षयिष्यन्त इति भविष्यत्प्रयोगात्। याज्ञिकैर्नामधेयैर्न लौकिकैः। असावित्यामन्त्रितकर्तृनामधेयप्रयोगेणोपह्वय-स्वेत्यनेन सह सामर्थ्यात्। कर्तार ऋत्विजो यजमानश्चान्योऽन्यस्मिन् कर्मव्यतिहारेणोपहवमनुज्ञामिच्छन्ते। प्रार्थयन्त इत्यर्थः। साधारणेषु सोमेष्वयं न्यायो युज्यते। कदा चिद्बहुतरं पास्यामीति। असाधारणेषु च। नानुपहूतेन सोमः पातव्य इति श्रुतेः।

१६. होमाभिषवकारिणः पूर्वो वषट्कर्ता भक्षयदृचनात्। तस्मिंश्च सति तद्विपरीतस्य न्यायस्यानवतारात्।

१७. द्विदेवत्या ऐन्द्रवायवमैत्रावरुणाश्विनाः नाराशंसवन्तश्च यज्ञाः। आज्यप्रउगमरुत्वतीयनिष्केवल्यवैश्वदेवेषु। एतेषां प्रतिभक्षितमध्वर्युरेकदेशशेषं होतृचमसे ऽवनयेत्। ऊते त्वा भक्षितमित्येवमादिना मन्त्रेण।

१८. अथ श्रुत्यन्तरोक्तं द्विरैन्द्रवायवग्रहस्यावनयनम्। मन्त्रश्च दिश्यते।

१९. अवसर्जनं विमोकः। स न कर्तव्यो द्विदेवत्यानाम्। यावत्तस्यास्य ग्रहस्यावनयनं न कृतमिति। उक्ता सोमभक्षपरिभाषा। इदानीमवसरप्राप्तो द्विदेवत्यभक्ष उच्यते।

५.

१. इह वसुरित्यादिना मन्त्रेणैन्द्रवायवग्रहमध्वर्यवे दत्त्वानन्तरमुपहूतौ वायुरित्यादिना भक्षयित्वा तमेवैन्द्रवायवं प्रग्रहणमन्त्रेण पुनः प्रगृह्य भक्षमन्त्रेण पुनर्भक्षयति। ऊरौ न निदधाति। नाध्वर्युर्भक्षति[1] न[2] होता परिसङ्ख्यानात्।

२. अध्वर्यव इति वर्तते। इह वसुरित्यादिना मन्त्रेण। मैत्रावरुणं ग्रहमध्वर्यवे प्रगृह्यानन्तरम्।

३. उपहूतौ मित्रावरुणावित्यनेन मन्त्रेण मैत्रावरुणं ग्रहं भक्षयति।

४. आश्विनं ग्रहं तमूरोरादाय शिरः प्रदक्षिणं पर्याणीय अवेक्ष्य तेनैव मार्गेण प्रत्यानीयावेक्षते। सर्वतः परिहारमाश्विनस्य भक्षयतीति (१३.६) श्रुतेः। अवेक्षणं तु शाखान्तरात्।

५. इहाध्वर्यवे प्रयच्छति। न पूर्वम्। आश्विनवचनात्।

६. उपहूतौ देवावित्येवमादिना मन्त्रेणाश्विनं भक्षयित्वानन्तर-

---

१ C ०ध्वर्युं भु०। २ A B C न; C (see.h.) del.

मुपस्पृश्य[1]। द्विदेवत्यभक्षपद्धतिरत्रोच्यते। अध्वर्य उपह्वयस्वेत्युपहवमिष्ट्वा तेनोपहूत उपहूतो वायुरित्यादिना भक्षयेत्। तत ऊर्ध्वोऽभिमर्शनमपामुपस्पर्शनं च[2]। एवं यथोक्तमैन्द्रवायवं मैत्रावरुणमाश्विनं च। अध्वर्य उपहवस्तस्य होमाभिषवकारित्वात्[3]। वषट्कारनिमित्तो हि भक्षो द्विर्हि तस्य वषट्करोतीत्यैन्द्रवायवे हेत्वारम्भात्[4]।

७. उपस्पृश्योष्ठनिलिम्पनादिना इडामुपह्वयते। इडाङ्गमुपस्पर्शनम्। तेनेतरयोरपि सवनयोर्भवति। द्विदेवत्यानां प्रथमो भक्षोऽथेडाथ होतृचमस इति (१३.६) श्रुतेः। [5]उपस्पर्शनं शाखान्तरात्।

८. चमसाध्वर्यवश्चमसानिडासमीपमुत्क्षिपन्ति।

९. होता सव्येन होतृचमसं पाणीं च संयच्छतीति (७) श्रुतेः।

१०. सर्वत्राज्यलेपेन सोमसंस्पर्शो वर्जनीयो न केवलमत्र।

११. इडामुपह्वयत इति प्रकृतम्। तामुपहूय अभक्षयित्वेत्यर्थः। इडायास्त्वायं नियमः। तत उत्तरेडां प्राश्नात्येव प्रकृतिवत्। उपह्वयेडामवघ्रायावद्यति प्राश्नात्युत्तरेडामथाप आचम्य होतृचमसं भक्षयतीति श्रुतेः। एवमुत्तरेडाभक्षाचमनानन्तरं प्रस्थितसंज्ञकास्सवनमुखीयान्होत्रादिभिर्वषट्कृतान्भक्षयन्ति[6] होत्रादयः। प्रातःसवने प्रस्थितभक्षे वृद्धसंप्रदाय उच्यते। होता[7] तावदध्वर्य उपह्वयस्व प्रतिप्रस्थातरुपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपहूतस्तेजसे त्वा ब्रह्मवर्चसाय भक्षयामीति भक्षयत्ययं शुक्रनिमित्तो भक्षः। भक्षयित्वा ग्रं मो भवे-

---

१ A. ins. अथ A B om. अत्रोच्यते B. om. भक्ष। २ A ins. सर्वेच। ३ C •कारित्वात्। ४ A ऐन्द्रवायवे हेत्वारम्भात् B •वायववयोश्च हे•। ५ C अनुप• alt. to अनप•। ६ A C (orig.) •सवनीयान्होत्रा•। ७ C होता वषनाद् अध्वर्यं।

त्यनयोरो ऽभिहृत्य तत उपस्पृशेत्। ततो ऽध्वर्युणा भक्षिते होता प्रतिप्रस्थातरुपह्वयस्वेत्युपह्वमिष्ट्वा तेनोपहूतः पूर्ववद्भक्षोरोऽभिमर्शनोपस्पर्शनानि कुर्यात्। अयं मन्थिनिमित्तो भक्षः। ततः प्रतिप्रस्थात्रा भक्षिते होता पुनरध्वर्यू इष्ट्वा ताभ्यामुपहूत उन्नीयमानवषट्कारनिमित्तं भक्षयत्युरोऽभिमर्शनादि च करोति। ततः[1] पुनर्होतृचमसे समाख्यानिमित्तभक्षार्थमध्वर्य उपह्वयस्व प्रतिप्रस्थातरुपह्वयस्वेत्युपह्वमिष्ट्वा ताभ्यामुपहूतो भक्षादि पूर्ववत् कुर्यात्। तत आप्यायनं यथोक्तम्। अथ ब्रह्मचमसम्। ब्रह्मन्नुपह्वयस्वेति तेनोपहूतः पूर्ववद्भक्षणादि सर्वं कुर्यादाप्यायनवर्जम्। तत उद्गातृचमसम्। उद्गातार उपह्वयध्वमिति उपह्वमिष्ट्वा तैरुपहूतः पूर्ववद्भक्षणादि कुर्यात्। सर्वमाप्यायनवर्जम्[2]। न त्वस्योद्गातृवर्जं भक्षणप्रसिद्धेः। अथ यजमानचमसम्। यजमानोपह्वयस्व सुन्वन्नुपह्वयस्वेति वोपह्वमिष्ट्वा तेनोपहूतः पूर्ववद्भक्षणादि कुर्यात्। अथ मैत्रावरुणचमसम्। प्रशास्तरुपह्वयस्व अध्वर्य उपह्वयस्वेत्युपह्वमिष्ट्वा ताभ्यामुपहूतः पूर्ववद्भक्षणादि कुर्यात्। ततो ब्राह्मणाच्छंसिनश्चमसम्। ब्रह्मन्नुपह्वयस्वाध्वर्य उपह्वयस्वेत्युपह्वमिष्ट्वा ताभ्यामुपहूतः पूर्ववद्भक्षणादि कुर्यात्। ततः पोतृचमसम्। पोतरुपह्वयस्वाध्वर्य उपह्वयस्वेत्युपह्वमिष्ट्वा ताभ्यामुपहूतः पूर्ववद्भक्षणादि कुर्यात्। ततो नेष्टृचमसम्। नेष्टरुपह्वयस्वाध्वर्य उपह्वयस्वेत्युपह्वमिष्ट्वा ताभ्यामुपहूतः पूर्ववद्भक्षणादि कुर्यात्। तत आग्नीध्रचमसम्। अग्नी-

१ A होतृचमसे. B C om. the passage beginning with होता पुनरध्वर्यू ending with ततः पुनः C होतृचमसे वषट्कारसमाख्या॰ (वषट्कार in marg.)।

२ C in marg. यथोक्तम्।

दुपह्वयस्वाध्वर्य उपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपह्रुतः पूर्ववद्भक्षणादि कुर्यात्। एवं होतुर्भक्षः। अथ ब्रह्मोद्गाता यजमानश्च होतरुपह्वयस्वेत्युपहवमिष्ट्वा तेनोपह्रुता यथाचमसं होतृवद्भक्षणादि कुर्युराप्याययेयुश्च। अथ मैत्रावरुणो ब्राह्मणाच्छंसी पोता नेष्टाग्नीध्रश्च होतरुपह्वयस्वाध्वर्य [1]उपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपह्रुताः[2] स्वंस्वं चमसं होतृवद्भक्षयेयुः। पुनश्च समाख्यानिमित्तं[3] होतरुपह्वयस्वाध्वर्य उपह्वयस्वेत्युपहवमिष्ट्वा ताभ्यामुपह्रुताः स्वंस्वं चमसं होतृवत्[4] भक्षितं भक्षयेयुराप्याययेयुश्च। इति प्रस्थितभक्ष उक्तः। अथ प्रकृतमुच्यते।

१२. तेजसे त्वेत्यादिर्भक्षमन्त्रः प्रातःसवने[5] औत्सर्गिकः।

१३. ओजसे त्वेत्यादिर्मन्त्रो माध्यन्दिने सवने[6] औत्सर्गिक एव।

१४. व्यवस्थितः प्रतिसवनमुत्सर्गः। वचनात्प्रकरणं भित्त्वा।

१५. शं नो भव हृद आ पीत इन्दो इत्यनयोरोऽभिमृशेत् सोमं भक्षयित्वा। भक्षयित्वेत्यतिरेकात्सर्वत्र द्विदेवत्यादिष्वपि।

१६. एतावदाप्यायनं न सोमासेक इति ज्ञापनार्थं [7]यथाप्राप्तस्योपदेशसूत्रम्।

१७. आ प्यायस्वेत्यादिका ऋगाप्यायनी। ततो न द्रव्यान्तरम्। अनया सव्यहस्तस्थितस्य चमसस्य दक्षिणेन स्पर्शनम्। प्रातःसवनवचनात्प्रातःसवन एवानया। नोत्तरयोः सवनयोः। अन्यथा विकल्पसमुच्चयौ[8] स्याताम्।

---

१ होतश्चपह्वयस्व C in marg.। २ B तेन। ३ B C (orig.) om. होतश्चपह्वयस्व। ४ According to C (marg.); A has दृष्ट्वा तेनाध्वर्युणा भ०। ५ C om. तेजसे० वने। ६ C om. ओजसे० वने। ७ C in marg. व्याख्या instead of यथा। ८ C (sec. h.) ins. वा।

१८. सं ते पयांसि समु यन्तु वाजा इतीयमाप्यायनी उत्तरयोः सवनयोः।

१९. होतृब्रह्मोद्गातृयजमानमैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्रच्छावाकाग्नीध्रचमसाः सवनमुखीयाः प्रस्थिताः। तान्भक्षितप्रतिभक्षितान्नाराशंसार्थमाप्याययन्ति[1]।

२०. आप्यायनप्रसङ्गमुपजीव्यान्यदाप्याह। आव्यग्रस्ते ग्रहभक्षानन्तरं ये चमसास्ते नाराशंसाख्या वक्ष्यन्ते। तान्भक्षितप्रतिभक्षितानाप्याययन्ति मरुत्वतीये च[2]।

२१. आच्यादिषु यथोद्दिष्टेषु ये वषट्कारेण चमसा हविर्धानस्था एव कल्प्यन्ते यदुक्तं कात्यायनेन नाराशंसानां च कल्पनमिति ते नाराशंससंज्ञाः। संव्यवहारार्थं[3] संज्ञाकरणं। नाराशंसानां सन्नानामुपवाते नाराशंस इति च।

२२. देवो ऽसीत्येवमादिना नाराशंसानां प्रातःसवने भक्षमन्त्रः। प्रातःसवनवचनमुत्तरयोरविकल्पार्थम्। नाराशंसवचनं सहापि ग्रहशेषेणायमेव नाराशंसानां भक्षमन्त्र इति नियमार्थम्।

२३. तस्य त ऊर्वैः पितृभिरित्यर्थसंबन्धादेव प्राप्नोति। विकारवचनमग्निष्टुति विकारान्तरप्रतिषेधार्थम्।

२४. तस्य ते काव्यैः पितृभिरिति तृतीयसवने प्रयोगः।

---

१ A C नाराशंसासादनार्थं। २ A om. the Comm. on this Sūtra.
३ C ते नाराशंसाः। संज्ञाकरणं नाराशंसानां।

६.

१. अकारान्तस्याप्यच्छावाकशब्दस्य सौदेतिशब्देन सह संबन्धे मकारस्य द्वित्वं छान्दसम्। शाखान्तर एवमेव प्रैषपाठात्। अथ वा। अच्छावाकः एतावत्सूत्रमधिकारार्थम्। अनन्तरं कर्म कुर्वन्नप्रमत्तो ऽस्यच्छावाक[1] उच्यते यदि सौदेत्यविशेषेण शाखान्तरे प्रैषः। वाजसनेयिनां प्रैषो नास्ति। तच्चाप्यासन्नमासीनन्यायं वाकृत्यमिति परिभाषितत्वात्।

२. अग्रेण सदसो बहिः उत्तरेण[2] अदूरेण स्रुतिं शालामुखीयादारभ्य उत्तरवेदेर्द्वारपरंपरया यो मार्गः स्रुतिशब्देन स उच्यते तमुत्तरेणोपविश्य। किमनन्तरमित्यत आह।

३. पुरोलाशखण्डमध्वर्युणा दत्तं गृहीत्वा ततः।

४. कर्मार्थं संप्रैषवचनम्। केषांचिदभ्यधिको ऽपि संप्रैषः।

५. अच्छा वो अग्निमवस इत्येवमाद्या ऋचो ऽच्छावाकस्तिस्रो ऽन्वाह।

६. तिसृणां यो ऽन्त्यो प्रणवस्तृतीये वचने तेन संततं वक्ष्यमाणं निगदमाह।

७. अयं निगदः। एतस्मिन्नच्छावाकेनोक्ते।

८. सर्वार्थो ऽयं[3] मध्ये ऽध्वर्युवचनात् द्वितीय उपहवमयमित्यादिस्तं होतरुपह्वयस्वेति होत्रर्थः।

---

१ A C (sec. b.) कुर्वन्नप्र॰ B C (orig.) कुर्वन् प्र॰। २ A उत्तरेण सुत्तरे अदूरेण B उत्तरेण सुतिं C उत्तरेण। उत्तरे अदू॰ (orig. अधरेण)। ३ A सर्व-मानीत्यादि मध्ये ऽध्व॰।

९. अयं तावत्प्रथमः कल्पः। यदा होता नोपह्वयते तदेतर उपह्वयेरन्नुत्तरस्याग्रहणात्।

१०. नायं निगदः। पूर्वस्य निगदवचनात्। ततो नैकश्रुत्यं नोच्चैस्त्वं। अयं सुब्रह्मण्यजमानो ऽग्रभीदित्यस्य विकारे पूहः। य उपह्वास्यमानो भवति स प्रत्येतेत्येवमादिकं मन्त्रं गाव उपहूता इत्येवमन्तं जपित्वा तत उतोपहूत इत्यैकश्रुत्येन ब्रूयात्।

११. यः पुनरनुपह्वास्यमानो भवति स उत नो गाव उपहूता इत्यातो जपेत्। अभिविधौ चायमाङ् द्रष्टव्यः। उतोपहूत इति न[1] ब्रूयादित्यर्थः। उपह्वास्यमान उच्यते। उपहवं दातुमिच्छन्। तद्विपरीतो ऽनुपह्वास्यमानः। न चायमुपहवः प्रायश्चित्तार्थो यथा कात्यायनेनोक्तः। ग्रावाभनाश्वग्नी सन्निवेशयोर्वेद्यां सुत्यास्व-प्रायश्चित्तमपराध इतरेतरस्मिन्नोपहवमिच्छेरन्यस्यामेकदीक्षेति (७.५.१२)। न च क्रियाविशेषणार्थो यथा नानुपहूतेन सोमः पातव्यः। तच्चोपहूतः। इत्युपहवश्छन्दोगानां। अतो ऽयं यथोक्तमेवं क्रियमाणमभ्युदयकारि भवतीति कृत्वा कर्तव्यः।

१२. उतोपहूत इति नोक्तो ऽच्छावाको यजमानत्वेनापि सत्त्रेषु स्थितो ऽच्छावाकवचनात्[2]। निवर्तध्वं मानु गातेत्येतस्य सूक्तस्य। सूक्तवचनात्तत आरभ्य वेदप्रैषस्य यावच्छक्नुयात् प्राक् संप्रैषात्ताव-दनुद्रवेत्। यावतीरिति (१३.८) श्रुतेः। प्रक्रान्ताया ऋचः समा-पनम्। अनुद्रवेदिति वचनाच्च गणधर्मो नैकश्रुत्यम्।

---

१ C (orig.) om. न। २ B अच्छावाक इति।

१२. होता वान्यतमो वा यजमानादीनां चरोचमानमच्छावाकं प्रत्युपहूय निवर्तध्वमिति यथोक्तं कुर्यात् ।

७.

१. उन्नीयमानायानुब्रूहीत्येवमध्वर्युणा संप्रेषितः प्रत्यस्मै पिपीषत इत्येतत्सूक्तमन्वाह चतुर्ऋचम् । स्वयमच्छावाकः सप्तमीमिति पक्षान्तरश्रुतेः । सूक्तवचनं स्वाभिप्रेतसिध्यर्थम् । अच्छावाकवचनं मैत्रावरुणनिवृत्त्यर्थम् ।

२. प्रातर्यावभिरा गतमित्यैन्द्राग्न्या यजतीति (२८.७) श्रुतेः।

३. पूर्वप्रसृप्तस्याच्छावाकीयां कुर्वतः समाख्याभक्षो न प्राप्नोति। तदर्थं भक्षितवचनम्। अप्रस्थितत्वादाप्यायनं न प्राप्नोति। तदर्थमाप्यायितवचनम्। अध्वर्यवे प्रदायेति नाराशंसप्रदानार्थम्। तथा च कात्यायनः। होतृचमसवत्सर्वमित्याह। दक्षिणावृदित्यादि नियमार्थम्। सदोवचनं दिवस्पृष्ठमित्यादिक्रियार्थम्। स्वस्य धिष्ण्यस्य पश्चादुपविश्य निर्गत्य पुरोलाशं प्राप्नोति। उच्छिष्टदोषपरिहारार्थं निर्गमनम्।

४. पूर्वप्रसृप्ता मैत्रावरुणादयः। तेषामन्यतमो यदि श्रुत्यन्तरीयाद्धोत्रासमासवचनादच्छावाकीयां कुर्यात् ततः स्वेन विसंस्थितसंचरेण सदसो निष्क्रम्याच्छावाकस्य बहिष्कर्माच्छावाकस्मीदित्युक्तोऽयेष सद इत्यादिकं कृत्वा स्वकर्म कुरुते। पुरोलाशप्राशनं कुरुत इत्ययं क्रमः। के चित्पूर्वग्रहणाद्यो ऽच्छावाकात्पूर्वः [1]प्रसृप्तः करोति।

---

१ B च प्रसृ०।

इतरस्तु यावत्तदप्रसृप्तः। अपूर्वत्वात्। सो ऽच्छावाकसंचरेणैव प्रतिपद्यते। अच्छावाकीयावचनात्मकत्वात्। न बहिष्कर्ममात्रम्। पूर्वप्रसृप्तो ऽपि न यजमानो न सदस्यो विसंस्थितसंचरेणेत्यारम्भात्। प्रत्यग्गमने हि स[1] विसंस्थितसंचरो न तु प्राग्गमने। सकृद्धिष्ण्योपस्थानम्। अच्छावाकस्य बहिःकर्मेति नियमात्। प्रसङ्गेनान्यत्रापि होत्रासमासे ये विशेषास्त उच्यन्ते। होत्रासमासशब्दश्च तन्त्रान्तरे प्रसिद्धः। एकस्य कर्तुरनेकार्त्विज्यक्रियायोगे। तत्र संचराणां सकृत्क्रिया। गन्तव्यस्य प्रधानत्वात्। इडाभक्षणमाग्नीध्रे। दधिभक्षणं दशरात्रे। शाखान्तरोक्तं मध्वशनं घृतस्य वा। तथा ऋत्विग्भ्यस्तं कारयेदिति पशुभक्षणम्। सहर्त्विग्भ्यो निर्वपतीत्योदनभक्षणम्। एतानि भक्षणानि सकृत्तन्त्रलक्षणात्। [2]सकृन्मधुपर्को गुणभूतत्वात्। सकृत्क्रियमाणप्रश्नः। तथा तानूनप्त्रम्। सकृदुपस्पर्शनानि। सकृत्संश्रयमाणपश्वीक्षणप्रायश्चित्तम्। सकृद्धिष्ण्योपस्थानाद्युपवेशनान्तं। भेदेनान्यान्युपस्थानानि। अथा विष्टेति च गच्छन् जपो भेदेन। स्वाश्रयत्वात्। धिष्ण्योपस्थानादि तु पराश्रयं सर्पणगुणभूतत्वात्। तान्सदः प्रसर्प्यन्नमस्यतीति श्रुतेः। सर्पणं सकृत्प्रवेशगुणभूतत्वात्[3]। प्रत्युपहवनस्याभेदस्तथा[4] श्रुतेः। धानाव्यादानं भेदेन। धिष्ण्येक्षणं सकृत्त्रिःसर्पणाङ्गत्वात्। निधनोपायः सकृत्कालासंभवात्। सकृदपुपादावधानम्। पृच्छामि त्वेत्यादिको ऽश्वमेधे यजमानप्रश्नो भेदेनापूर्वार्थत्वात्। सर्वौषधहोमे होत्रासमास एव नास्ति। परिकर्मा-

---

१ A B सः नयोर्वि°। २ C (in marg.) न् चष°। ३ A C भावात् instead of भूतत्वात्। ४ B भेदः।

होत्रन्यायात्[१]। प्रायश्च एतदेव न्यायप्रदर्शनार्थो वा प्रपञ्चः। प्रकृतमिदानीमुच्यते। स्वकर्म कुरुते इति वचनं नापरया द्वारा प्रविश्य स्वस्य[२] धिष्ण्यस्य पश्चादास्त इत्यर्थः। ततश्चमसमध्वर्यवे प्रदाय पुरोळाशं प्राश्य पूर्वया द्वारा प्रविश्य स्वकर्म कुर्यात्।

५. होता स्व एव धिष्ण्ये स्थितो ऽच्छावाकीयां करोति। नाच्छावाकीये। तुशब्देनान्यस्यापि होत्रकस्य होतृधिष्ण्य एव प्राप्तिर्दृढीकृता।

६. होतृविकाराणां च मैत्रावरुणप्रभृतीनां। होत्रकाणां या याज्यास्ताः स्वधिष्ण्य एव स्थितो होता कुर्यात्। गत्वा वा तदीयं धिष्ण्यम्। व्यपेषु वा होत्रकेषु प्राप्तिः शाखान्तरीयाद्वचनात्। प्रैषानुवचनशस्त्रादीनि स्वधिष्ण्य एव। याज्यावचनात्।

७. अधिकारो ऽयम्।

८. अथ प्रातःसवने प्रस्थितयागे होत्रका होता चानवानन्तो अनुच्छ्वसन्तो ऽर्धर्चेषु यजन्ति। तथा च श्रुतेः। क्षिप्रं देवेभ्यो हविः प्रदास्याम इति हेत्वर्थवादात्[३]। अर्धर्चशो वेत्यर्धर्चशः प्राप्तौ। न तु षष्ठे ऽहनि विकल्पो ऽनवानवचनात्तत्र।

९. कर्तार इत्यनुवर्तते। अथेति च। यज्ञकर्तारो ऽथ व्रतयन्ति। व्रतं कुर्वन्ति भुञ्जन्त इत्यर्थः। व्रतयन्तीति क्रियाभिधानात्सार्वकामिकमिति गम्यते।

---

१ B परिक्रम्य C (in marg.) प्र instead of परि। २ C om. स्वस्य। ३ A C (in marg.) ins. अर्धर्चशो वा। एतद्वै छन्दसां पर्व यदर्धर्चश इति चैतदर्थवादात्।

१०. तृतीयसवने नाराशंससंनिधौ य उपास्यन्ते पितृभ्यस्त औपासना इति वक्ष्यन्ते। तेभ्यश्चोर्ध्वमृत्विजो भक्षयन्ति।

८.

१. नियमार्थो ऽथशब्दः पूर्वस्याशनस्यानियमं दर्शयितुम्। ऋतुयाजैरिति संज्ञाकरणं संव्यवहारार्थम्। चरन्ति प्रचरन्ति तान्कुर्वन्तीत्यर्थः।

२. होता यक्षदिन्द्रं होत्रादित्येवमादिभिर्ऋतुप्रैषसंज्ञकैरनवानं प्राणसंततेनेत्यर्थः। प्रेष्यति मैत्रावरुणः ऋतुप्रैषेणापि। ननु प्रैषप्रैषार्थयोरेकस्मिन्कर्तरि न्यायविरोधः। उच्यते। स्यादेतद्यदि प्रैषस्यापूर्वार्थभावना[1] स्यात्। अत्र गृहपतिप्रैषे विकारेषूहः। स उच्यते। द्वियजमानके सुगृहपती। बहुयजमानके सुगृहपतयः। द्वियजमानके इमौ सुन्वन्तौ यजमानौ। बहुयजमानके इमे सुन्वन्तो यजमानाः। सुगृहपतिस्त्वमित्यनूह्यमभ्यभिधानत्वात्। अनेन सुन्वता यजमानेनास्य द्वित्वबहुत्वयोरूहः। आभ्यां सुन्वद्भ्यां यजमानाभ्यां। एभिः सुन्वद्भिर्यजमानैः। गृहपती यजतं एवं द्वियजमानके। गृहपतयो यजध्वमिति बहुयजमानके। स्यादित्येतस्य स्थाने द्वित्वबहुत्वयोर्भूयास्तां भूयासुरिति। गृहपते यजेत्यस्य स्थाने गृहपती यजतमित्येवमूहो राष्ट्रिमरायादिषु। गृहपतयो यजध्वमिति प्रत्यक्षौ-

---

[1] B भावना स्यात् A ॰भावो न C (orig.) ॰पूर्वाख्यभावो न in marg. ॰भावना।

पिशंङ्गे। सत्रेष्वेकस्यैव गृहपतिव्यपदेशाद्यजमानबहुत्वे ऽपि गृहपति-शब्दो यजमानपदमपि सत्र विक्रियते।

३. अनवानमिति क्रियाविशेषणं पूर्ववत्।

४. येनयेन प्रेष्यति मैत्रावरुणः सासा याज्या। तस्यतस्य प्रैषा-न्तोक्तस्य इयांस्तु विशेषः। उद्धृत्य होतायक्षच्छब्दं प्रतिप्रैषं चामुक यजामुक यजेति।

५. इन्द्र सोमं पिब ऋतुनेत्येता वा होत्रादिभिर्याज्याः कर्तव्याः। मैधातिथ्यो वेत्यार्षवचनान्नियमतः। अयोदशस्याप्यृतुग्रहस्याध्वर्युवशा-त्प्रयोगे सति मैधातिथ्येव कार्या अविनियुक्ता विनियुक्तानां[1] यात-यामत्वदोषात्। प्रैषस्य त्वेकस्य यद्यपि यथादेवतमध्वर्युवशाद्याज्या-भ्यासो ऽसंभवादन्यस्य[2]। तदनुसारेण प्रैषान्तश्रुतस्य ऋतुदेवता-तुल्यदेवता वृद्धैः कल्पिता एवं लिख्यन्ते। आ त्वा वहन्तु हरय इत्यैन्द्री। इन्द्रुरादिद्युतस्परीति मारुती। इह त्वष्टारमग्रियमिति त्वाष्ट्री। अग्निं दूतं वृणीमहे इत्याग्नेयी। ऋतेन यावृतावृधाविति मैत्रावरुणी। प्रातर्युजा वि बोधयेत्याश्विनी। द्राविणोदसं प्रैषं नाभ्यस्येत् ऋतुयाज्याकल्पस्येदङ्गीकृतः। कुतः। तल्लिङ्गाया ऋचो ऽसं-भवात्। स च इच्छेन्मृत्युं पाप्मानमपहन्यामित्येताभिर्यजेदित्यर्थ-वादात्। येन प्रेष्यति सा याज्येत्ययमेव पक्षः सर्वसूत्रकारपराकयोः। अग्निष्टुति च प्रैषयाज्याकल्पो ऽनूक्तत्वादृचः।

६. योयो होत्रादिः प्रैषान्ते श्रूयते होतर्यज पोतर्यजेत्येवं सस

१ B कार्या अन्या। उक्तानां । २ C यामाभ्यासो A प्रैषस्य त्वेकस्य यद्यभ्यासः येन यथादेवतमध्वर्युवशाद्याज्याभ्यासो ऽसंभवादन्यस्य।

यजतीन्द्र सोममित्याम्नायक्रमेण। प्रशास्तर्यजेति मैत्रावरुणो ब्राह्मण् यजेति ब्राह्मणाच्छंसी।

७. अध्वर्यू यजतमिति प्रैषान्ते होतरेतद्यजेत्यध्वर्युराह। एवमुक्तो होता क्रमप्राप्तां तदीयां याज्यामाह।

८. गृहपते यजेत्येतत्प्रैषान्ते यजमान आह होतरेतद्यजेति। ततो होता यजति।

९. तयोः संबन्धिन्यौ क्रमप्राप्तावित्यर्थः।

१०. येषामध्वर्यूणामसर्वहुतास्तैः सह क्रियायामेवं भवति। तत्र यो यस्य होमकारी स तस्मिन्नुपहवमिष्ट्वा सावनेन भक्षमन्त्रेणावजिघ्रत्योष्ठौ वा लिम्पति।

११. अन्ते[1] ऽध्वर्यौ प्रतिप्रस्थातरि वोपहवमिष्ट्वा सावनेन मन्त्रेण यथोक्तं भक्षणम्। पुनः[2] प्रतिप्रस्थातर्येवोपहवमिष्ट्वा। एवं द्विरन्ततो होता। अध्वर्युगृहपत्योर्भक्षो मा भूदिति सूत्रारम्भः। वाजिभिः सह क्रियायां पूर्वेषां द्रव्याणामभक्षणमेव। सर्वहुतत्वात्।

१२. एवो नियोगे[3]। इवशब्दः संप्रत्यर्थे ऽनर्थः। अत्र ऋतुयाजेषु भक्षयितृभिरोष्ठलेपनं[4] वा कर्तव्यमवघ्राणं वा। न पातव्यः सोमः। द्विदेवत्येष्वप्येवमेव। तत्रोक्ते होतुरेव केवलस्य स्यात्। अथर्तुयाजैश्चरन्तीत्यथशब्दस्यास्य चेतिकरणस्यैतत्प्रयोजनम्। कथं नामेतरयोः सवनयोः सर्वमेतत्प्रतिषिध्यते होत्रसंबन्धस्य केवलस्य प्रतिषेधो मा भूदिति।

१ C om. अन्ते। २ A ins. अध्वर्युं प्रष्टा। ३ A C स्वाजि॰ B इवो। ४ B लिम्पनं।

९.

१. आज्यमिति वक्ष्यमाणस्य शस्त्रस्य नामधेयम्। तच्छंसिष्यन्पिता मातरिश्वेत्येवमादिकं मन्त्रं जपित्वा ततः शोंसावो३ इत्याहावसंज्ञकः श्रुतान्तः। आद्यनिगदश्चायं प्रतिसवनं यथा पठितस्तेन प्रतिप्रस्थानादिष्वपि प्रतिमृष्टणस्तु न विक्रियते। शस्त्रादाविति वचनात्सर्वेच शस्त्रादावयमौत्सर्गिकः। प्रातःसवनवचनं प्रातःसवनिको ऽयमित्यस्य प्रतिपादनार्थम्। तेनाहूय तेनतेन यो यथाहावास्तेनतेन प्रतिगरितारमाहूय तत उपांशु तूष्णीं शंसाख्यमग्निर्ज्योतिरित्यादिकं शंसेत्।

२. नियमतो ऽवसानार्थमिह सर्वत्रावसानवचनं। नाद्यमाद्यनिगदः[1]। प्रउगे पुरोरुचामप्यवचनात्। ततश्च विकृतिषु यथार्थमूहः। एवमेतं तूष्णींशंसं शस्त्वा ततः पुरोरुचमनन्तरां पच्छो ऽवस्यन् शंसेत्।

३. अग्निर्देवेद्ध इत्यादिकां पुरोरुचं प्रणवान्तां[2] यथापठितां शंसेत्। विकारेष्वनाद्यनिगदत्वादियमूहितव्या।

४. प्रणवेन प्र वो देवायेत्याज्यसूक्तं संदध्यात्। सूक्तविहृतावपि प्रथमस्य सूक्तस्यायं धर्मस्तस्येत्यतिरेकात्।

५. मरुत्वतीयं नाम माध्यन्दिने सवने प्रथमं शस्त्रम्। तथा वैश्वदेवं तृतीयसवने। तयोश्च शस्त्रयोः। न केवलमाज्यस्य प्रथमस्य सूक्तस्य प्रथममर्धर्चं पच्छो ऽनवानं शंसेत्।

६. एतावा अत्र रोदसीत्येवमादिकमुत्तमावर्जं सूक्तशेषं शस्त्वा तत आहूय आहावमुक्त्वेत्यर्थः। उत्तमया परिधाय शस्त्रं परिसमा-

---

१ C नियमाय नि°। २ C om. प्रणवान्तां and has एतां instead।

ष्येत्यर्थः। उक्थवीर्यसंज्ञकं तदङ्गं मन्त्रं[1] जपति भा विभा इत्येवमादिकम्। ननु सूक्तमेषं शस्त्वेत्यतिरिच्यते। सत्यम्। आवापेषु सति सम्भवे सकलसूक्तस्य प्रक्षेप इत्येतत् ज्ञापयितुं सूक्तमेषं शस्त्वेति वचनम्। तथा च श्रुतिर्हेत्वर्थवादः कश्चित्। तदु ह स्माह कौषीतकिः शंसेदेव सूक्तस्याव्यवच्छेदायेति।

७. शस्त्रयाज्यासम्प्रैषनिमित्तमुक्थशा इत्यध्वर्युराह सर्वासु शस्त्रयाज्यासु। न केवलमत्रैव।

८. अग्न इन्द्रश्च दाशुषो दुरोण इति यजति। तथा श्रवणात्।

१०.

१. यदाज्ये शस्त्रे समाप्ते स्तुवते छन्दोगास्तस्यैवानुशंसनमेतदित्येतदर्थः सूत्रारम्भः। ननु सर्वत्र वाचनिकमाज्यम्। को ऽस्य विषयः। उच्यते। वाचःस्तोमे कश्चित्काल्पनिकेषु शस्त्रेषु[2]। अन्येषां शस्त्राणां पूर्वं स्तोत्रमनन्तरं[3] शस्त्रमस्य तूत्तरं स्तोत्रम्[4]। पवमानस्तोत्राणि[5] प्रउगमरुत्वतीयवैश्वदेवानामेव[6] श्रुतत्वात्।

२. परिभाषासूत्रमेतदिह क्रियते। प्रउगस्य व्यवहितस्तोत्रस्याज्यस्तोत्रेण सामसन्ततिर्यथा[7] स्यात्। स्तोत्रवतां शस्त्राणाम्। न तु सौत्रामणीशस्त्रप्रभृतीनां शाखान्तरदृष्टानां अस्तोत्रवतामयं धर्मः। एषेति प्राह स्तोत्रकारी। तस्यायमर्थः। एषोत्तमा ऋक् शंसतु

---

१ C (in marg.) मिमर्द instead of तदङ्गं। २ C om. शस्त्रेषु। ३ C (orig.) पूर्वमनन्तरं स्तोत्रम्; in marg. स्तोत्र and शस्त्र। ४ C om. स्तोत्रम्। ५ B ins. तु। ६ B एवमेव। ७ C om. साम।